न वयमिति साम्राज्यादि न कामयामहे। किंतु एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति। ननु तस्य श्रीहरिपादोपमं सर्वसंपद्भाजः किमेवं काम्यते अत आहुः। हे साध्वि साम्रा
ज्यं सार्वभौमं पदं। स्वाराज्यमैंद्रं पदं। भोज्यं तद्भयभोगसमृद्धं। विविधं राजंत इति विराट् तस्य भावो वैराज्यं अणिमादिसिद्धिभाक्त्वमित्यर्थः। पारमेष्ठ्यं ब्रह्मपदं। आनंत्यं मो
क्षो। हरेः पदं तत्सालोक्यादि न कामयामह इति। यद्वा बहुवचनात्मनो कृष्णमेगाग्रागादिदिक्षु एयाक्षिपत्यानि साम्राज्यभोज्यस्वाराज्यवैराज्यानि व्याख्येयानि ॥४१॥ नन्विं

न वयं साध्वि साम्राज्यं स्वाराज्यं भोज्यमप्युत। वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदं ॥४१॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः। कुचकुंकुमगं
धाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥४२॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः। गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥४३॥ ॥इति श्रीभागव
ते महापुराणे दशमस्कंधे त्र्यशीतितमोऽध्यायः ॥ ॥श्रीशुक उवाच ॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उत स्वगो
प्यः। कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥१॥ इति संभाषमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु। आययु
र्मुनयस्तत्र कृष्णरामदिदृक्षया ॥२॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः। विश्वामित्रः शतानंदो भरद्वाजोऽथ गौतमः ॥३॥ ॥ ॥

तत्पादरज एवं काम्यते अत आहुः। श्रियः कुचकुंकुमगंधाढ्यमिति श्रियाऽऽदिसेव्यया यापि साऽपि सेवितत्वादिति भावः ॥४२॥ ननु तर्हि श्रीरतिदुर्लभत्वात्किं तद्वांछया। अत
आहुः। व्रजस्त्रिय इति। यत्तथा। गावः ... महात्मनोऽस्य चारयतः पादस्पर्शं च गोपा यथा वांछंति तद्वत्। ततः तृणानां सुलभमिति भावः ॥४३॥ इति दशमे त्र्यशीतितमः
चतुरशीतितमे तु मुनिसमागमे। वसुदेवमखोत्साहं वेषस्यापनादिकं। सुबलपुत्री गांधारी। माधवी सुभद्रा। क्षितिपानां राज्ञां पत्न्यः। स्वगोप्यः कृष्णभक्ता गोप्य
ः विसिस्म्युः विस्मयं चक्रुः ॥१॥

द॰कु॰ ॥६॥ आनर्चुः अर्चितवंतः ॥७॥ धर्मगोप्त्री तनुर्यस्य धर्मगुप्ततनुः। यता नियता वाग्यस्य तत्सदसः ॥८॥ जन्मभृतः सफलजन्मानः। तत्फलं जन्मफलं। किं तत् यद्योगेश्वरदर्शनं ॥९॥
८८ किंवा तु भक्तं दर्शनमेव तावद्देवानामपि दुःप्रापं अस्माकं तु स्पर्शनादिकमपि कथं तु वर्तितमिति विस्मयेनाह किमिति। स्वल्पतपसां तीर्थस्नानादिमात्रेण तपोबुद्धिर्येषां तेषां तथाऽर्चायां +ध्यं+३

रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः। पुलस्त्यः कश्यपोऽत्रिश्च ब्रह्मपुत्रस्तथांगिराः। अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥५॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः। पांडवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ॥६॥ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत्। स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥७॥ उवाच सुखमासीनान्भगवान्धर्मगुप्ततनुः। सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ॥८॥ श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं। देवानामपि दुःप्रापं यद्योगेश्वरदर्शनं ॥९॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां ॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं ॥१०॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥११॥ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः। उपासिता भेदैर्हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥१२॥

कृतो

प्रतिमायां देवमतिश्चक्षुर्दृष्टिर्येषां तेषां योगेश्वरस्पर्शनादिकमिदं किमसंभावितमित्यर्थः ॥१०॥ एतत्प्रपंचयति। न ह्यम्मयानीति त्रिभिः। वाङ्मनसोरप्युपासनाविषयत्वं यो वाचं प्रसेऽप्युपात्ते यो मनो प्रसेऽप्युपात्त इति श्रुतेः। अघं तन्मूलमज्ञानं न हरंति। अत्र हेतुः भेददृष्टितः भेदकर्तारः। यद्वा भेदबुद्धिं कुर्वतः पुंसः। विपश्चितो निरस्तभेदाः। ते तु मुहूर्तमात्रसेवयैवाघ्नंतीति ॥१२॥

अतः साक्षात्त्वं विहायान्यत्रात्मादिबुद्ध्या मज्जमानोऽतिमंद इत्याह । आत्मबुद्धिरहमिति बुद्धिः । त्रयो धातवो वातपित्तश्लेष्माणः प्रकृतयो यस्य तस्मिन् कुणपे शरीरे । स्वधीः
स्वीया इति बुद्धिः । भौमे भूविकारे इज्यधीः देवताबुद्धिः । यत्र यस्य तीर्थबुद्धिस्तीर्थमिति बुद्धिः । अभिज्ञेषु तत्त्वविन्सु यस्य न ताः बुद्धयो न संति स एव गोषु पि खरः दासणा अत्यविवे
की । पशुः । गवां तृणादिभारवाहः खरो गर्दभः इति ॥१३॥ दुरन्वयं अनवरूपं । भ्रमंती अनवस्थिता धीर्बुद्धिर्येषां ते ॥१४॥ ईशितव्यतां अनीश्वरतां कर्माधिकारितां । जनसंग्रहमा
त्रमेतदित्यूचुः । स्मयंतः हसंतः ॥१५॥ अनवद्यं विद्वांसमाज्ञ इत्यहंतेन मायया यथेति । तत्त्वविन्सु उत्तमा अपि वयं कामैर्मायया यया विमोहिता इति तामाहुः । यदिति । यत्र यस्मा

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥१३॥ श्रीशुक उ
वाच ॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः । वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धियः ॥१४॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यता । जनसंग्र
ह इत्यूचुः स्मयंतस्तं जगद्गुरुं ॥१५॥ मुनय ऊचुः ॥ यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः । यदीशितव्यायति गूढ ईहया अहो ।
विचित्रं भगवद्विचेष्टितं ॥१६॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा । भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंब
नं ॥१७॥

तदेहया नरचेष्टितेन गूढः सन् ईशितव्यायति अनीश्वरवदाचरति भवाञ्च । न चाहमीश्वरश्चेत्किमित्येवमाचरेयं तत्राहुः । अहो इति भगवतस्तव विचेष्टितं अतर्क्यं ॥१६॥ भगव
त्त्वमेवाहुः । अनीह इति अनीहः अक्रिय एव आत्मना स्वरूपमात्रेणाव बहुधेत्यत्र दृष्टांतः । यथा भौमैरिति । भौमैर्घटादिविकारैरुपलक्षिता । वाचारंभणं विकारो नामधेयं मृत्ति
केत्येव सत्यमिति श्रुतेः । ननु कथमहं जगत्स्रष्टा साक्षिकर्ता वसुदेवपुत्रत्वादिति तत्राहुः । अहो इति । विभूम्नः परिपूर्णस्य तव इदं जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति
॥१६ ७॥

ह॰ उ॰
८९

तनसंग्रहमाहुः। अथापीति विभिः। सत्वेषुस्वसत्वात्मकरूपं विभर्षि। स्वलीलया आचारेण वेदपथं च विभर्षि॥१८॥ अत एव ब्राह्मणोत्तुक्तमानमपि करोषीति सहेतुकमाहुः
ब्रह्मेति। ब्रह्म वेदाख्यं। शुक्लं शुद्धं। ते हृदयं अंतरंगं रूपं कृतं स्यात आहुः यत्रेति। यत्र यस्मिन् ब्रह्मणि व्यक्तं कार्यं अव्यक्तं कारणं। त तः परं सत सन्मात्रं ब्रह्म वतप आदिभिरुपलब्धं तत
ब्रह्म॥१९॥ तस्माद्धेतोस्त्वद्धृदयत्वाद्धेतोः सर्वत्र कब्राह्मण कुलं शास्त्रयोनेर्देहस्य माणकस्पतवमहा मत्रेष्टम्तुपलब्धिस्थानं संभाव्यतिसंरक्षयसि। तत्तस्मादेव कारणात्तत्त्वं ब्रह्म।

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च। स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान्॥१८॥ ब्रह्म ते हृदयं शुक्लं तपः स्वाध्यायसंयमैः। यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परम्॥१९॥ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः। सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान्॥२०॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः। त्वया संगम्य सद्गत्या यदन्तः श्रेयसां परः॥२१॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे। स्वयोगमायया छन्नमहिम्ने परमात्मने॥२२॥ न यं विदन्त्यमी भूपा एकारामाश्च वृष्णयः। मायाजवनिकाच्छन्नमात्मानं कालमीश्वरं
२३॥ यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक्। नाममात्रेंद्रियाभातं न वेद रहितं परं॥२४॥ ॥

ण्या नाम अग्रणीर्भवान्। तत्व वर्तकः सत्कर्म विरमीत्यर्थः॥२०॥ तस्मादीश्वरस्य तव वेदं जनसंग्रह मात्रं व पयंतु तव संगात्या कृतार्था इत्याहुः। अद्येति षड्भिः। सतां गत्या त्वया
संगं प्राप्य। एतयस्मात्त्वं श्रेयसां परोऽवधिः॥२१॥२२॥ एकस्मिन्नेवस्थाने आरामो येषां तेऽपि कालं स्वस्वादिकारणं॥२३॥ एतत्सहृष्टांतमाहुः। यथेति। शयानः स्वप्ने पुरुष
गुणतत्वदृक्स्वप्नविषयेषु तत्स्वदृष्टिः। नाममात्रेंद्रियेण मनसा आभातं न तु स्थितं च्या व्यादिरूपमात्मानं वेद तद्रहितं देवं नादिरूपमात्मानं न वेद यथा॥२४॥ ॥ २६-वृं
८९

४ह२३

१६४२

एवं त्वा त्वां नाममात्रेषु स्वप्नादितुल्यविषयेषु॥ इंद्रियैर्याईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद। स्मृतेर्विवेकस्योपप्लवान्नाशात् ॥२५॥ अघौघस्य मर्षं नाशं करोति यन्
गात्वं तीर्थं तस्यास्पदमाश्रयं तेऽंघ्रिं। सुपक्वयोगै रपि हृदि कृतं केवलं न तु दृष्टं॥ तस्य ते ऽंघ्रिं ददृशिम दृष्टवंतो वयं वृद्धिः शापैः अतोऽस्मान् भक्तान् अनुगृहाण भक्तान् अनुग्रहीतुं अर्हसीत्
वित्यर्थः ननु किं भक्त्या यया दृष्टं तत्प्रत्यक्षं ततो मामितिनेत्याह उत्सिक्ता उद्रिक्ता या भक्तिस्तया उपहत आशयलक्षणो जीवकोशो येषां त एव दृष्टवंतो भवद्गतिमापुर्नान्ये इ

एवं त्वा नाममात्रेषु विषयेष्विंद्रियेहया। मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२५॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सु
विपक्वयोगैः उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथोऽनुगृहाण भक्तान् ॥२६॥ श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं
युधिष्ठिरं। राजर्षे स्वाश्रमान् गंतुं मुनयो दधिरे मनः ॥२७॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः। प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२८॥
श्रीवसुदेव उवाच ॥ नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ। कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां ॥२९॥ ॥श्रीनारद उवाच॥ नातिचित्रमि
दं विप्रा वसुदेवो बुभुत्सया। कृष्णं मत्वाऽर्भकं यन्नः पृच्छति श्रेय आत्मनः ॥३०॥ संनिकर्षोऽत्र मर्त्यानामनादरणकारणं। गांगं हित्वा यथाऽन्यांभस्त
त्रत्यो याति शुद्धये ॥३१॥

नि ॥२६॥ ॥२७॥ उपसंगृह्य चरणावुपादाय बभाषे इदमिति संबंधः राजर्षेः ॥२८॥ सर्वदेवा येषु ते भ्यः यावंतो देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति श्रुतेः॥ येन कर्मणा यथा
कृते नवा। कर्मणां निर्हारो निरासो भवति तदुच्यतां ॥२९॥ श्रीकृष्णं संहितास्मानृच्छतीति विस्मितान् प्रत्याह नारदः नातीति बुभुत्सया बोद्धुमिच्छया ॥३०॥ तत्रत्यः गंगातीरवासी
॥३१॥

१८४२

१फ१ १ल१

तं-तु. श्रीकृष्णेऽर्भकत्वमानोऽविद्याविजृंभितइत्याहयस्येतिद्वाभ्यां। अनुभूतिर्ज्ञानं। कुतश्चिदपिनशिष्यतिननश्यति। नदेवाहं। कालेनकर्करिकालेवत्। अस्यनिश्वसंयोगमादि
६० मादि। सतत्त्वविद्युदादिवत्। अनन्यस्यास्वगुणादिवत्तद्यादेः। गुणानोहपाद्यंनरोत्पन्नेः। एवंरूपादिहन्यादेहादिवत् ॥२१॥ नमेवंकृतश्चिदपद्याहतानुभवं। अतएवेश्वरं। किंच
अहितीयंतत्त्वंअनः शान्तः उपरूढमात्त्वंमनुष्यंमनेनां केः क्लेशकर्मादिभिः। ततक्लेशारागादयश्वानसर्वकाणिकर्माणिविततस्विपाकेसुखेऽरेवा। सत्वादिगुणेनांश
नः स्वाहश्वतेः। शाणादिभिस्वस्वविभवैः स्वकार्यैः। अत्रदृष्टान्तः। मेवहिमोपरागैः। अभ्रतपाररागकृतिः स्वविभवैः सूर्यमिवेति ॥२४॥ ५॥ विनस्योपशमनुपशमहेतुः योगं

यस्यानुभूतिः कालेनलयोत्पत्त्यादिनाऽस्पृष्टाः स्वतोऽनन्यस्यास्वगुणतोनकुतश्चनरिष्यति ॥२२॥ तंक्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभव
मीश्वरमद्वितीयं। शाणादिभिः स्वविभवैर्हतपश्चमनोमनेतसूर्यमिवमेवहिमोपरागैः ॥२३॥ अथोत्तु मुनयोराजन्नाभाष्यानकृतदुःकृतिः। सर्वेषांश्च
तत्वतोरागांतथैवाश्रुतरामयोः ॥२४॥ कर्मणाकर्मनिर्हारएषसाधुनिरूपितः। यच्छ्रद्धयायजेद्विष्णुंसर्वयज्ञेश्वरंमखैः ॥२५॥ विनस्योपशमोपवैकं
विभिः शास्त्रचक्षुषादर्शितः सुगमोयोगधर्मश्चात्मसुदावहः ॥२६॥ अयंस्वस्ययनःपंथाद्विजातेर्गृहमेधिनः। यच्छ्रद्धयाप्नवित्तेनशुक्लेनेज्येतपूरुषः
॥२७॥ १ल्वै१

मोक्षोपायश्च। शनैरात्मसुखमावहतीतितथा। सुगमः सहजत्वाश्रयत्वात्। धर्मश्चआश्रयकः अन्यथाविहिताकरणेनमालिन्यप्रसंगात् ॥२६॥ ननुनकर्मणानयज्ञया
धनेनत्यागेनैकेअमृतत्वमानशुरित्यादिनात्यागस्यैवविहितत्वात्कथंकर्ममोक्षोपायः इत्याशंक्यआदावेवत्यागस्याशक्यत्वादित्याशयेनाह। अयमितिमार्गइत्युमि
गःस्वस्ययनः स्वस्तिःक्षेमःईयतेनेनेतितथा। श्रद्धयाप्नवित्तेः कामतयाशुक्लेनशुद्धेन। आप्नेनवित्तेनअक्षयईशःस्त्येनेनियतएषपंथाः ॥२७॥ ॥ ॥ ॥ ॥ ॥ ॥ ६०

स्वस्य यत्तत्त्वमाहुः वित्तैषणामिति वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत। गृहैः गृहोचितैर्भोगैर्दारसुतैषणां विसृजेत तदनुभवेनैव ततो उन्मुक्त्यनिष्टत्वेः दे-
हे स्थिते आत्मनः स्वर्गादिलोकैषणां कालेन नश्यत्वानुसंधानेन विसृजेत तदेवं हे वसुदेव। यद्वा देवकालेन देवानामपि नश्वरत्वानुसंधानहेतुभूतेनेत्यर्थः। अत्र ऋणत्रयं प्रमाणयति रसध्या१२
ग्राम इति ॥३८॥ किं चानृणो हि। तथा च श्रुतिः। जायमानो वै ब्राह्मणस्त्रिभिरृणैर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यादि। तामनी

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम्॥ आत्मलोकैषणां देव कालेन विसृजेद्बुधः। ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनम्॥३८॥ ऋणै-
स्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो। यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत्॥३९॥ त्वं त्वद्य मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते। यज्ञैर्दे-
वानामृणान्मुच्यानृणोऽशरणो भव॥४०॥ वसुदेव भवान्नूनं भक्त्या परमया हरिम्। जगतामीश्वरं प्रार्चः स यद्वां पुत्रतां गतः॥४१॥॥ श्रीशुक उवाच
इति तद्वचनं श्रुत्वा वसुदेवो महामनाः। तानृषीनृत्विजो वव्रे मूर्ध्नानम्य प्रसाद्य च॥४२॥ त एनमृषयो राजन्वृता धर्मेण धार्मिकम्। तस्मिन्न-
याजयन्क्षेत्रे मखैरुत्तमकल्पकैः॥४३॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः। स्नाताः सुवाससो राजन्राजानः सुष्ठ्वलंकृताः॥४४॥ तन्महि- रद्दूर२
ष्यश्च मुदिता निष्ककण्ठ्यः सुवाससः। दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः॥४५॥ ॥

नव तीर्थेनैषां ऋणानामनपाकृत्य तथा च मनुः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति ॥३९॥ निर्गताः निर्मुक्ता ऋणाः॥ रद्द१
२ अशरणो भव गृहात्प्रव्रज ॥४०॥ किं च। अविशुद्धचित्तानामपंकमः त्वं तु कृतार्थ एवेत्याह वसुदेवेति। प्रार्चः अर्चितवान्। यद्यस्मात् वां युवयोः ॥४१॥ आलिप्ताः कुंकुमा-
दिभिः वस्तुपाणयः गृहीतार्हणहस्ताः ॥४५॥॥

रा॰तु॰ अभ्यंगो नेत्रपोषं जनेन। अभ्यक्तं सर्वांगेषु नवनीतेन ॥४७॥ ताभिः पत्नीभिः सहितो दीक्षितो विरेजे ॥४८॥ ॥ जीवेशो सर्वजीवानामीशो ॥५०॥ अत्र यज्ञं शतयज्ञः आम्नातम्
७१ वर्गाः शास्त्रज्ञाः ज्योतिशेम दर्शपौर्णमासादयः। तेभ्यश्चोदना लिंगादिभिरतिदेशप्राप्तांगाः वैकृताः सौर्यसत्रादयः। तेसर्वैः इष्टवान् पुरोडाशादि। ज्ञानं मंत्रः। क्रियाकर्म तेषामीश्व

नेदुर्मृदंगपटहाः शंखभेर्यानकादयः। ननृतुर्नरनर्तक्यस्तुष्टुवुः सूतमागधाः। जगुः स्वकंठघोषं गंधर्व्यः संगीतं सह मर्दकाः ॥४६॥ तमभ्यषिंचन्त्वि
ध्विवदक्तमभ्यक्तमृत्विजः। पत्नीभिरष्टदशभिः सोमराजमिवोडुभिः ॥४७॥ ताभिर्दुकूलवलयैर्हाररत्नसुरत्नकुंडलैः। स्वलंकृताभिर्विबभौ दीक्षि
तोऽजिनमंडनः ॥८॥ तस्यार्त्विजो महाराजरत्नकौशेयवाससः। ससदस्या विभुस्तुल्ययथार्हं न्यहाणो धुरे ॥४९॥ तदाराम स्वक्षमस्वस्वैः स्वैर्वेश्मभिरन्वि
तैः रेजतुः ससुतैर्हरिजीवेशौ स्वविभूतिभिः ॥५॥ इतीत्थं यज्ञविधिना अग्निहोत्रादिलक्षणैः। शक्रतैर्वैकृतैर्यज्ञैरीजे ज्ञानक्रियेश्वरः ॥५१॥ अथ
र्त्विग्भ्यो ददौ कालेयथाम्नातं सदक्षिणाः। स्वलंकृतेभ्योऽलंकृत्य गोभूकन्या महाधनाः ॥५२॥ पत्नीसंयाजावभृथ्येष्ठे स्वरित्वा ते सहर्षयः ॥ स
स्त्रीरामकूदे विशायजमानपुरःसराः ॥५३॥ स्नातोलंकारवासांसि विप्रेभ्यो दात्त्वयाखिपः। ततः स्वलंकृतो वाणीनाश्वभ्योऽन्नेन सृजयत ॥५४॥ अ
वंधून्दासान्स्वसुतान्पारिवर्हेण भूयसा। विदर्भकोशलकुरुकाशिकेकयपंचजयाज्ञ ॥५५॥ सदस्यार्त्विक्सुरगणाञ्ज्ञभूनपित्त्वारणान् ॥ अ
निकेतनमनुज्ञाप्य शंसंतः स्वयपुर्गृहं ॥५६॥ ॥ ॥

वं ॥५१॥ २ सस्नुः स्नानेन शक्राः ॥५३॥ आवभृथः स्नानो मिथ्याप अन्नेन सृजयत अस्रजयत ॥५४॥ वं ध्या दीन् वारणांतान् पारिबर्हेण प्रीतिदानेन चास्रजयत। तेच सर्वे स्वपुः ॥५५॥५६॥ ॥ ७१

जगाणो केषांचिद्विशेषमाह धृतराष्ट्र इति द्वाभ्यां। अनुजो विदुरः पार्थाः युधिष्ठिरभीमार्जुनाः यमौ नकुलसहदेवौ ॥५७॥ सौहृदेनाक्लिन्नानि चेतांसि येषां ते ॥५८॥ ७ ॥ म
नोरथो यत्र विषयस्तमेवमहार्णवं ॥६०॥ शूराणां बलेन। योगिनां ज्ञातेनापीत्यर्थः ॥६१॥ तत्कृतस्तत्र व्याहाभ्यामिति। कृताज्ञेषु कृतमुपकारमजानत्सु। सत्तमैर्भवद्भिरश

धृतराष्ट्रोऽनुजः पार्था भीष्मो द्रोणः पृथा यमौ। नारदो भगवान्व्यासः सुहृत्संबंधिबांधवाः ॥५७॥ बंधून्परिष्वज्य यदून्सौहृदाक्लिन्नचेतसः।
पद्धुर्विरहकृच्छ्राणां स्वदेशं स्वापरे जनाः ॥५८॥ नंदस्तत्र सहगोपालैर्बृहत्या पूजयार्चितः। कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बंधुवत्सलः ॥५९॥ वसुदेवो
ञ्जसोत्तीर्य मनोरथमहार्णवं। सुहृद्वृतः प्रीतमना नंदमाह करे स्पृशन् ॥६०॥ श्रीवसुदेव उवाच ॥ भ्रातरीश कृतः पाशो नृणां यः स्नेहसंज्ञितः
तं दुस्त्यजमहं मन्ये शूराणामपि योगिनां ॥६१॥ अस्मास्वप्रतिकल्पेयं यत्कृताज्ञेषु सत्तमैः मैत्र्यर्पिताऽफ
लाचापि न निवर्तेत कर्हिचित् ॥६२॥ प्रागकल्पाच्च कुशलं भ्रातर्वो नाचराम हि। अधुना श्रीमदांधाक्षा न पश्याम पुरः सतः ॥६३॥ मा राज्यश्री
रभूत्पुंसः श्रेयस्कामस्य मानद। स्वजनानुत बंधून्वा न पश्यति ययांधदृक् ॥६४॥ एवं सौहृदशैथिल्यचित्त आनकदुंदुभिः। रुरोद तत्कृतां मैत्रीं स्मर
न्नश्रुविलोचनः ॥६५॥

तिकल्पा अनुपमा मैत्री यैः अर्पिता अफला अपि चेत्तथाप्यकारणत्वादपि कर्हिचिद्विद्यद्यस्मान्न निवर्तेत तस्मादीश्वरकृतः पाशोऽयं नवनामितिगम्यत इत्यर्थः ॥६२॥ अफलत्वमेवाह प्रागि
ति। हे भ्रातः अकल्पात् असमर्थत्वात् वः कुशलं प्रियं नहि आचराम कृतवंतो वयं। सौहृदशैथिल्यचित्त आनकदुंदुभिः। रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥६५॥

९.उ. अद्यश्वइतिप्रातर्निर्गमेद्यैवापराह्णेगमनतामिति। अपराह्णनिर्गमेश्वोगमनतामितिपुनः पुनरेवंमानिनः ॥६६॥ ६७॥ यापितः महतासैन्येनशस्यापितः ॥६८॥ ७०॥ यडदे
५१ वसवसुदेवस्यमहोत्सवंयज्ञादिलसद्गोष्ठुहृत्संदर्शनादिकंचेति ॥७१॥ ॥इतिदशमेचतुरशीतितमः ॥ पंचशीतितमेरामकृष्णौसंप्रार्थितौस्तुतौ। पित्रेज्ञानमथोमात्रेस्व

नेदत्तकमव्युः प्रियकृतपेशलागोविंदरामयोः। अद्यश्वइतिमामांहीशयदुभिर्मानितोवमत ॥६६॥ ततः कामैः पूर्यमाणाः सव्रजाः सहबांधवः
। एताः ध्यामराताः सोमनानानर्घ्यपरिच्छदैः ॥६७॥ वसुदेवोग्रसेनाभ्यांकृष्णोद्धवबलादिभिः। दत्तमादायपारिबर्हंयापितोयदुभिर्ययौ ६८ ९२
नंदोगोपाश्चगोप्यश्चगोविंदचरणांबुजे॥ मनःक्षिप्तंपुनर्हर्तुमनीशामथुरांययुः ॥६९॥ बंधुषुप्रतियातेषुवृष्णयः कृष्णदेवताः। वीक्ष्य
प्राहृषमासन्नांयदुद्वारवतींपुनः ॥७०॥ जनेभ्यः कथयांचक्रुर्यदुदेवमहोत्सवं। यदासीत्तीर्थयात्रायांसुहृत्संदर्शनादिकं ॥७१॥ ॥इतिश्री
भागवतेमहापुराणेदशमस्कंधेतीर्थयात्रानुवर्णनेचतुरशीतितमोध्यायः ॥ ॥श्रीशुकउवाच ॥ ॥अथैकदात्मजौप्राप्तौकृतपादाभिवंदनौ
। वसुदेवोभिनंद्याहप्रीत्यासंकर्षणाच्युतौ ॥१॥ मुनीनांसवचः स्मृत्वापुत्रयोर्धामसूचकं। तद्वीर्यैर्जातविस्रंभः परिभाषा[illegible]भाषत ॥२॥

तानपुत्रानयच्छतां। नंदयित्वाकृतस्नेत्रयात्रायांसुहृदोवृष्णयः ततस्नानंततः पित्रोरादिशन्स्मसख्युभिः ॥१॥ धामसभावत्तत्त्वकं। जातविस्रंभः प्रसन्नविश्वासः।
परिभाष्यसंबोध्य ॥२॥ ८२

अस्य विश्वस्य यस्मात्सकाशात्स्वरूपभूतं कारणं प्रधानपुरुषौ नाम परौ तयोरपि कारणत्वेनेश्वरौ वसात्साक्षात्सांख्या मितिजानते ॥ ३ ॥ न विद्वद्विश्वमनेकैः कारकैर्जायमानं कृतः प्रधानपुरुष
मेकं कृतं तत्तरामात्वयो तत्कारणत्वेनेश्वरत्वं तत्राहयन्वेति । यत्राधिकरणे । येन कर्त्रा करणेन वा यतो पादानात् । यस्मै संबंधेन षष्ठ्यर्थस्याकर्तृत्वेपि निमित्ततोक्ता । यस्मै संप्रदान
यायद्यदिति प्रयोज्यकर्तृकर्मकारके दर्शिते । ननु तयोर्नास्ति भेदः । एवं यो कर्ता करोति । क्रियमाणेन न कश्चित्कर्मणा विनाभवत्यर्थस्य कर्ता विकरोतेः कर्म जायते । तथा करो
त्यर्थस्य यः कर्ता भवितुः प्रयोजकः । भविता तमपेक्ष्यास्य प्रयोजकत्वं प्रयच्छत इति च । सत्यं । तथाप्यवस्थाभेदेन भेदो विवक्षितः । दृश्यते चावस्थाभेदः । तंडुलानो द

कलसक्तसमहायोगिन्संकर्षणसनातन ॥ जानेवामस्य यस्मात्साक्षात्प्रधानपुरुषौ परौ ॥ ३ ॥ यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा । स्यादिदं भ
गवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ४ ॥ एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ॥ आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यजः ॥ ५ ॥ ॥ ॥

नं पचतीत्यत्र हृदं स्वरूपं करोतीति । तदेवं सप्तविभक्त्यर्था दर्शिताः । यथेति यदेति च क्रियाविशेषणभूतानामन्येषां व्याख्यानामर्थः । स्यादिति क्रियापदार्थोपलक्षणं । एवं सर्वप्रपंच
मनुष्यतत्कारणभगवद्रूपतां विधत्ते । इदं साक्षादिति । यथा तं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवांस्त्वमेव साक्षात्तत्रापि । तयोरैक्यमिसभिप्रेत्येकवचनं ॥ ४ ॥ किं चाधारण
पोषण कर्तापि त्वमेवेत्याह एतदिति । हे आत्मन् प्राणः क्रियाशक्तिः जीवो ज्ञानशक्तिः स्वसृष्टं त्वमेव बिभर्षि ॥ ५ ॥

द॰उ॰ ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशंक्य प्राणादिशक्तयोपि तस्यैवेत्याह प्राणादीनामिति। प्रा-
५२ णाः सूत्रेन्द्रादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य परमकारणस्येश्वरस्यैव। कुतः पारतंत्र्यात्। यथा वेधशक्तिर्बाणस्यापि तत्प्रयुक्तपुरुषस्य तद्वदित्यर्थ-
ः ननु भवतु प्राणादिवर्गस्य स्वातंत्र्यमेव किं न स्यात् तत्राह वैसादृश्यात् तद्वयोरिति। चेतनाचेतनत्वेन वि[illegible]सदृशत्वात् तद्वयोरचेतनप्राणादिवर्गस्य चेतनपा-
रतंत्र्यमेव युक्तमित्यर्थः। यद्वा प्राणादिषु तद्वयोर्द्वयोरेव तावद्विसदृशत्वं विरुद्धक्रियाकारित्वात्। किंपुनर्बहूनां। तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाधिष्ठिता ना-

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः॥ पा-
रतंत्र्याद्वैसादृश्यात् द्वयोश्चेष्टैव चेष्टतां॥ ६॥

मेव विशिष्टकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति। तथा चोक्तं। यदैते संहताभावा भूतेन्द्रियमनोगुणाः। यदायतननिर्माणे [illegible] न शेकुर्ब्रह्मवित्तमा। तदा संहत्य चान्योन्यं भ-
गवच्छक्तिचोदिताः। सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यद इति। तथा नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुमित्यादि। ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे
कुतः स्यादत आह चेष्टैव चेष्टतामिति। चेष्टमानानामेषां चेष्टैव न शक्तिः। यथा वायोः शक्त्यात्तृणादीनां चलनं। यथा वा पुरुषस्य शक्त्या शराणां वेग इति॥ ६॥ ५२

पारतंत्र्यमेव प्रपंचयति। कांतिरिति पंचभिः। चंद्रस्य कांतिः अग्नेस्तेजः अर्कस्य प्रभा। ऋक्षविद्युतां सत्ता स्फुरणमात्रेण सत्त्वं अर्थतो वस्तुतो भवान्। तथा च श्रुतिः न तत्र सू
र्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। स्मृतिश्च। यदादित्यगतं तेजो जगद्भासयतेऽखिलं। यच्चंद्रमसि
यच्चाग्नौ तत्तेजो विद्धि मामकमिति। भूमेर्वृत्तिः धारणमाधारत्वेन वर्तनं। गंधश्च भवानत्र वैव शक्तिरित्यर्थः ॥७॥ किं चाहे देव अपां तर्पणं तृप्तिजनकत्वं प्राणनं जीव
नहेतुत्वं ता आपश्च तासां रसश्च त्वमेव। किं वा वायोरोजः सहादि तवैव शक्तिः ॥८॥ दिशां स्वरूपाधिष्ठितकाशप्रदेशानामवकाशः दिशश्च त्वं। खं च सामान्याकाशः त

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कर्क्षविद्युतां। यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधोर्थतो भवान् ॥७॥ तर्पणं प्राणनमपां देव त्वं ताश्च तद्रसः। ओजः सहो
बलं चेष्टा गतिर्वायोस्तवेश्वर ॥८॥ दिशां त्वमवकाशोसि दिशः खं स्फोट आश्रयः। नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः ॥९॥ इंद्रियं त्विं
द्रियाणां त्वं देवाश्च तदनुग्रहः। अवबोधो भवान् बुद्धेर्जीवस्यानुस्मृतिः सती ॥१०॥ भूतानामसि भूतादिरिंद्रियाणां च तैजसः। वैकारिको वि
कल्पानां प्रधानमनुशायिनां ॥११॥

दाश्रयः। स्फोटश्च शब्दतन्मात्रं परा तस्या वागित्यर्थः। नादः पश्यंती ओंकारः मध्यमा वर्णश्च। आकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तद्द
वि र्शयिता ग्राहिका वैखरी त्वमित्यर्थः ॥९॥ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः। देवाश्चेंद्रियाधिष्ठातारः तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वं। अवबोधोऽध्यवसाय
शक्तिः। अनुस्मृतिः प्रतिसंधानशक्तिः ॥१०॥ भूतानां कारणं भूतादिस्तामसोऽहंकारस्त्वमसि। इंद्रियाणां तैजसोऽहंकारस्त्वं। विविधं अधिदैवाध्यात्मभेदेन कल्पं तन्वंतीति विक
ल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहंकारस्त्वं। अनुशायिनां जीवानां संसारकारणं प्रधानं त्वं ॥११॥

द॰रू॰ अविद्यानश्वरेषु नाशशीलेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं तत्त्वमसि। द्रव्यविकारेषु मृत्सुवर्णादिकार्येषु घटकुंडलादिषु नश्वरेषु द्रव्यमात्रं मृत्सुवर्णादिमा
९४ त्रमनश्वरं यथा तद्वत् ॥१२॥ ननु त्रिगुणात्मककार्यरूपोऽपि त्वमित्युक्तं त्वात्कथमनश्वरत्वं तत्राह सत्त्वमिति। न हि त्वयास्तन्यविद्या मायामहदादयः। अध्यासात्तास्त्वयि
परे ब्रह्मणि कल्पिताः ॥१३॥ तस्मान्न संतीति। ननु संतो कथं न संतीति तत्राह। यर्हीति। यदा विकल्पितास्तदैव संतीति मायेनात्त्वयि संतीति। त्वं चामीषु तदैव कारणतया अनु

नश्वरेष्विह भावेषु तदसि त्वमनश्वरम्॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं ॥१२॥ सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः। त्वय्यद्धा ब्रह्मणि
परे कल्पिता योगमायया ॥१३॥ तस्मान्न संत्यमी भावा यर्हि त्वय्येव कल्पिताः। त्वं चामीषु विकारेषु ह्यन्यदा व्यावहारिकः ॥१४॥ गुणप्रवाह
एतस्मिन्नबुधास्त्वखिलात्मनः। गतिं सूक्ष्मामबोधेन संसरंतीह कर्मभिः ॥१५॥ यदृच्छया नृतां प्राप्य सुकल्पामिह दुर्लभां। स्वार्थे प्रमत्तस्य
वयो गतं त्वन्माययेश्वर ॥१६॥ असावहं ममैवैते देहे चास्यान्वयादिषु। स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत् ॥१७॥ ॥४॥ ७॥ ॥ ॥

अत्र षन्नवतिपत्रस्यानेकपृष्ठं पठित्वा पुनः

गतः। अन्यदा तु अव्यावहारिकोऽविकल्पस्त्वमेवावशिष्यस इत्यर्थः ॥१४॥ एवंरूपत्वाज्ञाननिबंधनश्च संसार इत्याह। गुणप्रवाह इति। सूक्ष्मां निःप्रपंचां गतिमबुधा
: अविद्वांसः। अबुधेति वा पाठः। अतः अबोधेन देहाभिमानेन कृतैः कर्मभिः संसरंतीति ॥१५॥ एवं तयोक्तत्वं निरूप्य तदप्राप्त्या शोचति। यदृच्छयेति। नृतां मनुष्यतां।
सुकल्पां पटुतरेंद्रियां ॥१६॥ अहो किमिति प्रमत्तोऽसि त्वया बद्धाः पाशैर्निबद्धत्वादित्याह। असावहमिति। देहो अस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैत इति ॥१७॥ ९४

नतुनानाविकारवत्तांकुतोऽल्पत्वं। नाब्रह्मणएवोपाधिधर्मैर्बहुधाभवतीतीतिसदृष्टांतमाहद्वाभ्यां। आत्माहीति। यथाखवादिभूतानितत्कृतेषुघटादिष्वाविस्तिरोभा
वादियांति। एवममात्मापिआत्मसृष्टैर्गुणैः कृत्वातत्कृतेषुदेहेषुबहुधाईयते। पुनस्त्वयथाशयंयथोपाधिआविर्भावतिरोभावादिरूपेणप्रतीयतेनवस्तुतः। एकोबहु
धास्वयंज्योतिर्हस्यत्वेनानित्योऽनित्यत्वेन। अन्योऽनन्यत्वेननिर्गुणःसगुणत्वेनेत्यादिबहुधात्वंप्रपंचनीयं॥२४॥ हृ॥ सुविस्मितासती॥२७॥ समाश्राव्यसंबोध्य॥२८॥ भू

आत्माह्येकःस्वयंज्योतिर्नित्योऽन्योनिर्गुणोगुणैः। आत्मसृष्टैस्तत्कृतेषुभूतेषुबहुधेयते॥२४॥ खंवायुर्ज्योतिरापोभूस्तत्कृतेषुयथाशयं॥
आविस्तिरोऽल्पभूर्येकोनानात्वंयात्यसावपि॥२५॥ श्रीशुकउवाच॥ एवंभगवताराजन्वसुदेवउदाहृतः। श्रुत्वाविनष्टनानाधीस्तूष्णीं
प्रीतमनाअभूत॥२६॥ अथतत्रकुरुश्रेष्ठदेवकीसर्वदेवता। श्रुत्वानीतंगुरोःपुत्रमात्मजाभ्यांसुविस्मिता॥२७॥ कृष्णरामौसमाश्राव्यपुत्रा
न्कंसविहिंसितान्। स्मरंतीकृपणंप्राहवैक्लव्यादश्रुलोचना॥२८॥ देवक्युवाच॥ रामरामाप्रमेयात्मन्कृष्णयोगेश्वरेश्वर। वेदाहंवांवि
श्वसृजामीश्वरावादिपूरुषौ॥२९॥ कालविध्वस्तसत्वानांराज्ञामुच्छास्त्रवर्तिनां। भूमेर्भारायमाणानामवतीर्णौकिलाद्यमे॥३०॥ यस्यांऽशांशां
शभागेनविश्वोत्पत्तिलयोदयाः। भवंतिकिलविश्वात्मंस्तंत्वाद्याहंगतिंगता॥३१॥ चिरान्मृतसुतादानेगुरुणाकिलचोदितौ। आनिन्यथुः
पितृस्थानाद्गुरवेगुरुदक्षिणां॥३२॥ तथामेकुरुतंकामंयुवांयोगेश्वरेश्वरौ। भोजराजहतान्पुत्रान्कामयेद्रष्टुमागतान्॥३२॥ ॥ ॥

मेर्भारायमाणानांराज्ञामर्यैतेषांनिधनार्थंमेमयिकिलावतीर्णौ। हेआद्य॥३०॥ यस्यांशःपुरुषस्तस्यांशोमायातस्याःअंशागुणास्तेषांभागेनपरमाणुमात्रलेशेनविश्वो
त्पत्त्यादयोभवंति। तंत्वात्वांगतिंशरणंगता। स्मि॥३१॥ ३॥ आनिन्यथुःआनीतवंतौपितृस्थानात्यमसदनात्॥३२॥ ॥ ॥

२५

॥ ३४ ॥ दैत्यराड्बलिः कथंभूतौ विश्वस्यात्मभूतं दैवं माधवः सपरिवारः ॥ ३५ ॥ स हृष्टः सपरिजनः कथंभूतौ पादाववनिज्य पदंबु पपौ रवनेजनोदकं आब्रह्मब्रह्माणमभि
व्याप्य जगत्पुनत्या चित्रयद्वन्नेतिनौ ॥ ३६ ॥ ७ ॥ इंद्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया। बिभ्रत्धारयन् ॥ ३८ ॥ अनंताय शेषाय। बृहते फणैकदेशे विश्वधारणात् बृहततमौ। कृ

श्रीऋषिरुवाच ॥ एवं मंत्रो दितेर्माता रामः कृष्णश्च भारत। सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥ ३४ ॥ तस्मिन्प्रविष्टावुपलभ्य दैत्यराड्वि
श्वात्मदैवं सुतरां तथात्मनः। तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ॥ ३५ ॥ तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र
महात्मनोस्तयोः। दधार पादाववनिज्य तज्जलं सवृंद आब्रह्मपुनद्यदंबु ह ॥ ३६ ॥ समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः।
तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥ ३७ ॥ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया। उवाच हानंदज
लाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरः ॥ ३८ ॥ बलिरुवाच ॥ नमोऽनंताय बृहते नमः कृष्णाय वेधसे। सांख्ययोगवितानाय ब्रह्मणे परमा
त्मने ॥ ३९ ॥ दर्शनं वां हि भूतानां दुःप्रापं चाप्यदुर्लभं। रजस्तमःस्वभावानां यन्नः प्राप्तौ यदृच्छया ॥ ४० ॥ दैत्यदानवगंधर्वाः सिद्धविद्याध्रचारणाः
यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥ ४१ ॥ विशुद्धसत्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि। नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥ ४२ ॥ ॥

१ सायं च सदानंदरूपाय वेधसे जगद्विधात्रे सांख्ययोगवितानाय प्रसादिपदत्रयमैक्यविवक्षया ॥ ३९ ॥ योगेश्वराणामपि दुर्दर्शौ युवामस्माभिर्दृष्टावित्येतन्नातिचित्रमित्याह दर्श
नमिति। दुःप्रापमपि कृष्णत्वकृपया केषांचिददुर्लभं तु सममपि भवति। तदाह रजस्तमःस्वभावानामिति। नो दर्शनं प्राप्तौ ॥ ४० ॥ अहो विद्विषो वयं सात्विकभक्तेभ्योऽपि सभाग्या ८
इत्याह दैत्येति त्रिभिः ॥ ४१ ॥ ४२ ॥

अहोत्वमत्रयोरावयोः किमिदमारोप्यते अत आह ध्रुवमिति भूभारक्षत्ररूपणार्थं अवतीर्णो तथाह निश्चितो आत्थ कथयसि ॥१८॥ ततस्माद्दत्ताशरणमापन्नानां संसृतिभय
मयहतीति तथा तता ननु त्वमति स्वेवोढ्या किंनिर्विद्यसे अत आह। एतावतेति। इंद्रियलालसेन इंद्रियार्थलंपटया। यतः येनेंद्रियलालसेन मम मर्त्ये शरीरे आत्म हृक् आत्मबुद्धिरहं त्व
यिवपरे परमेश्वरे अपत्यबुद्धिरिति तेनालंपर्याप्तमिति ॥१९॥ ननु कृतएन तत्र अहं परमेश्वरइति तत्राह सूतीयहइति। अत्तुसुगं ग्रतिस्तुग्मं यदा सुतपाः पृश्निरिति युग्मं। तो आवयोः

युवांननःसुतौसाक्षात्प्रधानपुरुषेश्वरौ। भूभारक्षत्ररूपणअवतीर्णौतथात्थह ॥१८॥ तत्तेगतोस्म्यरणमद्यपदारविंदमापन्नसंसृतिभयाप
हमार्तबंधो। एतावतालमलमिंद्रियलालसेनमर्त्यात्महृक्त्वयिपरेयदपत्यबुद्धिः ॥१९॥ सूतीगृहेननुजगादभवानजोनौसंजज्ञइत्यनुयुगं
निजधर्मगुप्त्यै। नानातनूर्गगनवद्विदधज्जहासिकोवेदभूम्नउरुगायविभूतिमायां ॥२०॥ ॥श्रीशुकउवाच॥ आकर्ण्येत्थंपितुर्वाक्यंभग
वान्सात्वतर्षभः। प्रत्याहप्रश्रयानम्रःप्रहसन्श्लक्ष्णयागिरा ॥२१॥ ॥श्रीभगवानुवाच॥ वचोवःसमवेतार्थंतातैतदुपमन्महे। यन्नःपुत्रान्स
मुद्दिश्यतत्त्वग्रामउदाहृतः ॥२२॥ अहंयूयमसावार्यइमेचद्वारकौकसः। सर्वेऽप्येवंयदुश्रेष्ठविमृश्याःसचराचरं ॥२३॥ ॥ ॥ ॥ ॥ ॥

यदा वकश्यपोऽदितिश्चेति युग्मं। अधुना वसुदेवो देवकी च युग्मं। एवं हि त्रितियुग्मं। अज एवाहं संजज्ञ अवतीर्ण इति भवाननु जगाद। ननु नासौ यत्तु भुंजो देव इति तत्राह। नाना
तनूरिति। गगनवदसंग एव त्वं अन्भूम्नः सर्वगतस्य विभूतिरूपां मायां ॥२०॥ ॥२१॥ उपमन्महे उपमन्यामहे। समुद्दिश्य विषयीकृत्य। तत्त्वग्रामस्तत्त्व समूहः उदाहृतः समग्रज्ञानि
हृपितः ॥२२॥ इमामेव दृष्टिं सर्वत्र विक्षिप्त्वेत्याह। अहमिति। एवं विमृश्याः ब्रह्मत्वेनैव ज्ञातव्याः। किं च सचराचरं जगदिति ॥२३॥ ॥

९५ ॐ उद्बद्धवैरेणापि भक्त्या केचनेति चैद्यादयः। कामतो भक्त्या गोप्यादयो यथा सन्निकृष्टाः त्वदात्मतां प्राप्ताः न तथा सत्वसंरब्धाः सत्वाविष्टा अपि ब्रह्मादयो न सन्निकृष्टा इति।।४३

९६ ननु मास्ति केऽप्यो ऽपि रागमात्रः सन्निकृष्टा इति चित्रं तत्राह। इदमित्थमिति। इदमिति स्वरूपतः। इत्थमिति विशेषतश्च ।।४४।। तदेवं यद्यपि वैरभावेनापि त्वत्प्राप्तिर्भवति तथापि मांसा

निर्वक्तुं विनिशार्थयते। तन्न इति। तत्तथातः प्रसीद निरपेक्षैरमकामैरपि विमृग्यं तु युष्मत्पादारविंदं तदेव धिषणामाश्रयः तस्माद्धम्यगृहं तदेवांधकूपः तस्मान्निष्क्रम्य निर्गत्य

x ऌ x3

केचनोद्बद्धवैरेण भक्त्या केचन कामतः। न तथा सत्वसंरब्धाः सन्निकृष्टाः सुरादयः ।।४३।। इदमित्थमिति प्रायस्तव योगेश्वरेश्वर। न विदंत्य २

पि योगेशा योगमायां कुतो वयं ।।४४।। तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात्। निष्क्रम्य विश्वशरणांघ्र्यु

पलब्धवृत्तिः शांतो यथैक उत सर्वसखैश्चरामि ।।४५।। शाध्यस्मानीशितव्येश निष्पापान्कुरु नः प्रभो।। पुमान्यच्छ्रद्धयातिष्ठंश्चोदनाया वि

मुच्यते ।।४६।।

विश्वस्य शरणा रक्षितारो ब्रह्मास्तेषामंघ्रिमूले तु स्वत एव गलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन सोऽहं शांतः सन् एक एव चरामि। उत अथवा सर्वेषां सखायो

ये महांत स्तैः सह यथा चरामीति ।।४५।। कथमस्मद्गुणानामेवं भावः संभवति इति चेत् तत्राहि यथैतत्स्यात्तथास्माननुशिक्षयेत्याह। शाधीति। हे प्रभो ईशितव्याः सर्वे जी

वास्तेषामीश। यत्र वा अनुशासनं श्रद्धयातिष्ठन् आश्रयञ्चो दनाया विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते। न तु त्वदनुरक्तो विधिकिंकरः स्यादिति भावः ।।।४६।।। ९६

२

तदुक्तं सर्वमत्तमोद्यत्स्वागमनकारणंसप्रपंचं कथयति। आसन्निति पंचभिः। उर्णायां भार्यायां प्रथमे मन्वंतरे स्वायंभुवमन्वंतरे। मे देवाः सुतां वा वयमित्युक्तं जन्मैव सुनेतरमित्युद्यतं
सुतं कंचन्नापतितं सहस्व उपहसितवंतः॥४७॥ तेनावद्यकर्मणा पापेन आसुरी योनिमागमं प्राप्ताः॥ अधुना ततस्तामेव। हिरण्यकशिपो जाता इत्यर्थः। तद्योगमायया ततो
नीताः सततः॥४८॥ देवक्याउदरे जाताः हे राजन्स्वले। तेच कंसेन विहिंसिताः। सा च ना नाम्नतान्मत्वा शोचति। ते वेमे नवांतिके ध्यासते॥४९॥ लोकं देवलोकं॥५०॥ स्मरो ह्री

श्रीभगवानुवाच॥ आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेंतरे। देवाः कं जहसुर्वीक्ष्य सुतां यमितुमुद्यतम्॥४७॥ तेनासुरीमगन्योनिमधुना स्कं०११२
वद्यकर्मणा। हिरण्यकशिपोर्जाता नीतास्ते योगमायया॥४८॥ देवक्या उदरे जाता राजन्कंसविहिंसिताः। सा तान् शोचत्यात्मजान्स्वांस्त इमेऽध्यासते
ऽन्तिके॥४९॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये। ततः शापाद्विनिर्मुक्ता लोकं यास्यन्ति विज्वराः॥५०॥ स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्र
भृद्घृणी। षडिमे मत्प्रसादेन पुनर्यास्यन्ति सद्गतिम्॥५१॥ इत्युक्त्वा तान्समादाय इंद्रसेनेन पूजितौ। पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छताम्॥५२॥ तान्
दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी। परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः॥५३॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुतम्। मो
हिता मायया विष्णोर्यया सृष्टिः प्रवर्तते॥५४॥ पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृतः। नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः॥५५॥ ते नमस्कृ
त्य गोविंदं देवकीं पितरं बलं। मिषतां सर्वभूतानां ययुर्धाम दिवौकसाम्॥५६॥ ॥

थः स्मरस्सहितः उद्गीथः सहतिमोद्यः। स्मरस्यैव हर्षकीर्तिमानिति नाम। अतः कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिरर्पयामासेत्युक्तं॥५१॥ अपच्छतां अर्पयामासतुः॥५२॥
अमृतत्वे हेतुः गदाभृतः पीतशेषमिति। नारायणांगस्पर्शेन प्रतिलब्धा देवा वयमित्यात्मदर्शनं येषां ते॥५५॥ धाम देवलोकं॥५६॥

१५८११

द०उ० मृतानामागमनं निर्गमं च श्रीकृष्णस्य मायां मेने। नैवापत्यादिरूपेण रचितां ॥५७॥ ५८॥ अमृतं कीर्तिर्यस्य तस्य व्यासपुत्रैः शिवचनं श्रावार्थेन गत अघं भिनत्तीति तथा तत्
८१ अलं निःशेषं यथा भवति तथा न कृष्णादिविदिति। न देवं मो हेतुत्वं पापक्षय हेतुत्वं चोक्तं। तत्कर्णानां तु भक्तकर्णपूरं परमसुखावहं कर्णाभरणमिति स्वयं तु स्वस्वरूपतामा
ह। किं वा भगवति कृतमावेशितं चित्तं येन स तथाभूत्वा तत्क्षेमधाम कालादिभयरहितं लोकं याति ॥५९॥ इति दशमे पंचाशीतितमः ॥ षडशीतितमे दंभात्सुभद्रामर्जु

तं दृष्ट्वा देवकी देवी मृतागमननिर्गमं ॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ॥५७॥ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः। वीर्याण्यनं १ता२१
तवीर्यस्य संत्यनंतानि भारत ॥५८॥ सूत उवाच ॥ य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः। जगदघभिदलं तद्भ १लं१२
क्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥५९॥ इति श्रीभागवते महापुराणे दशमस्कंधे मृताग्रजानयनं नाम पंचाशीतितमोऽध्या
यः ॥ राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वसारं रामकृष्णयोः। यथोपयेमे विजयो या ममासीत्पितामही ॥१॥ श्रीशुक उवाच ॥ अर्जुनस्ती
र्थयात्रायां पर्यटन्नवनीं प्रभुः। गतः प्रभासमशृणोन्मातुलेयीं स आत्मनः ॥२॥ दुर्योधनाय रामस्तां दास्यतीति न चापरे। तल्लिप्सुः स यतिर्भूत्वा त्रिदंडी
द्वारकामगात् ॥३॥

नो हरत। गत्वा च मिथिलां कृष्णो नृपविप्रावनंदयत। पित्रोः स्वज्ञानमादिश्य सुभद्रां फाल्गुनाय च। जगाम मिथिलां कृष्णः स्वभक्तप्रियकृत्ततः ॥१॥ देवक्या मृतसुतलाभवदस्य अ
र्जुनस्य सुभद्रालाभोऽपि रामप्रतिकूल्यात् दुर्घटः इति मन्यमानः प्रसंगात्पृच्छति ॥१॥२॥ कथमस्मत्पितामहो राज्ञा दुर्योधनायापि ति। अपरे वसुदेवादयो न दास्यंतीति। तल्लिप्सुः तस्यां मातु ८१
लेयां लिप्सुः रामं वंचयितुं स्वात्मानं विदंडिवेषं विधाय गतः स्वाहं यतिरिति ॥३॥

यो पत्त्रतपरिविष्टं तत्रैकस्यं किलार्जुनो वुभुजे इत्यन्वयः ॥ ५ ॥ भावेन रत्यभिप्रायेण आस्तृमितं मनो हृदये
स्वार्थसाधकः कन्यां प्रेक्षुः ॥ ४ ॥ तं आतिथ्ये नामिमं अग्रहमानीयवले नयच्छ्रयो पत्त्रतपरिविष्टं तत्रैकस्यं किलार्जुनो वुभुजे इत्यन्वयः । कामेन क्षमच्छिन्नं पस्पर्शः । शंराम्रा दिक्षमा रतिमित्तं सु
हे ॥ श्री ईशाया गीमश्री इकरासीन स्मित्रेव नस्तं हृदयमीक्षणं चपमोयामा ॥ ७ ॥ अंतरं हृदुर्मवसरं प्रेक्षुः ग्रावमिछुः । कामेन क्षमच्छिन्नं पस्पर्शः । शंरामा दिक्षमा रतिमित्तं सु

एकदा गृहमानीय आतिथ्ये न निमंत्रितो । गृह
तत्र वैवार्षिकान्मासान्स वात्सीत्स्वार्थसाधकः । पौरैः स भाजितो भीक्ष्णं रामेणाज्ञानतापसः ॥ ४ ॥ एकदा गृहमानीय आतिथ्ये न निमंत्रितो । गृह
यो पत्त्रतमेसंवले न वुभुजे किल ॥ ५ ॥ सोपश्यत्तत्र महती कन्यां वीरमनोहरां । श्रीमत्कुन्ले क्षणां तस्यां भावल्लबं मनो दधे ॥ ६ ॥ सापि तं वकमे
वीरस्त्र नारीणां हृदयं गमांहमं तीव्रालिंतापां गीतनर्महृदयेक्षणा ॥ ७ ॥ तां परं समनुध्याय श्च अंतरं प्रेक्षुरर्जुनः । नलेभे शं भ्रमच्छिन्नः कामेनाति
वलीयसा ॥ ८ ॥ महत्यां देवयात्रायां रथस्थां द्वारिनिर्गतां । तदा राजमतः पित्रोः कृष्णस्य च महारथः ॥ ९ ॥ रथस्थो धनुरादाय स्वरांश्वान्धतोभ
रातः विद्राव्य क्रोशतां स्वानां स्वभागं मृगराडिव ॥ १० ॥ तच्छ्रुत्वा क्षुभितो रामः पर्वणीमेवेहागिवः । गृहीतपादः कृष्णेन सुहृद्भिश्चान्वशाम्य
त ॥ ११ ॥ प्राहिणोत्पारिवर्हाणि वरवध्वोर्मुदा वलः । महाधनो पस्कारेभरथाश्वनरयोषितः ॥ १२ ॥ श्रीमुनि[redacted]रुवाच ॥ ॥ कृष्णस्यासीद्द्विजःश्रे
ष्ठः कृष्णदेवेतरसिक्तः । कृष्णैकभक्त्या पूर्णार्थः शांतः कविरलंपटः ॥ १३ ॥ स उवास विदेहेषु मिथिलायां गृहाश्रमी । अनीहयागताहार्य
निर्वर्तितनिजक्रियः ॥ १४ ॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत । नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः ॥ १५ ॥

स्व ॥ ८ ॥ आसमंतादुं धतः आवरणं कुर्वतः ॥ १० ॥ ११ ॥ परिवर्हाणि वरवध्वोः प्रीतिदेयानि ॥ १२ ॥ अनीहया अप्रयत्नेनैवागतं यदाहार्यं भोज्यं तेन निर्वर्तिता निजाः क्रिया
येन सः ॥ १४ ॥ यात्रामात्रं शरीरादिनिर्वाहमात्रभोज्यं उपनमति तिष्ठत्यागच्छति ॥ १५ ॥

त्त१३

द.उ. मिथिलस्यात्मज जनकस्य वंश्यो मैथिलः ॥ १६ ॥ प्रभुरेवस्य पूर्वं विदेहान्प्रययौ ॥ १७ ॥ शल्यो व्यासः रामो भार्गवः अहं शुकः एवमादिभिः सह ॥ १८ ॥ १९ ॥ आनर्त्तादि गणितानां हि देशवासिनो जनार्यः
९८ ः उदारहासं स्निग्धमीक्षणं यस्मिन् तत् दर्शिभिर्नैत्रैः ॥ २० ॥ स्ववीक्षणेनैव विनष्टतमिस्रा दृशो येषां तेभ्यः क्षेमं अभयं अर्थदर्शनं तत्वज्ञानं च ॥ २१ ॥ अभीयुः प्रतिजग्मुः ॥ २२ ॥ प्रीता

तथानद्राट्पालोंग बहुलाश्व इति श्रुतः। मैथिलो निरहंमान उभावप्यच्युतप्रियौ ॥ १६ ॥ तयोः प्रसन्नो भगवान्दारुकेणाहृतं रथं। आरुह्य साकं मु
निभिर्विदेहान्प्रययौ प्रभुः ॥ १७ ॥ नारदो वामदेवोत्रिः कृष्णो रामो सितो रुणिः। अहं बृहस्पतिः कण्वो मैत्रेयश्च्यवनादयः ॥ १८ ॥ तत्र तत्र तमायांतं
पौरा जानपदा नृपा उपतस्थुः सार्घहस्ताः ग्रहैः सूर्यमिवोदितं ॥ १९ ॥ आनर्तधन्वकुरुजांगलकंकमत्स्यपांचालकुंतिमधुकेकय कोशलार्णाः।
अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः ॥ २० ॥ तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छ
न् शृण्वन्दिगंतधवलं स्वयशोशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥ २१ ॥ तेच्युतं प्राप्तमाकर्ण्य पौरा जानपदा नृप। अभीयुर्मुदितास्तस्मै गृही
ताहर्णपाणयः ॥ २२ ॥ दृष्ट्वा त उत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः। कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥ २३ ॥ स्वानुग्रहाय संप्राप्तं मन्वानौ
तं जगद्गुरुं। मैथिलः श्रुतदेवश्च पादयोः पेततुः प्रभोः ॥ २४ ॥ न्यमंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः। मैथिलः श्रुतदेवश्च युगपत्संहतांजली ॥ २५ ॥

उत्फुल्लानि आननानि आशयाः अंतःकरणानि च येषां तैः कैः शिरोभिः ॥ २३ ॥ २५ ॥ ॥ ४ ॥ ॥ ॥ श्रीराम ॥ ॥ ॥ ४ ॥ ॥ ॥ ४ ॥ ॥ ॥ ४ ॥ ॥ ९८

तदभिप्रेत्य अंगीकृत्या तत्तदा उभाभ्यामपि ताभ्यां मद्गृहादमस्योहं पा॥त्यलक्षितः। यद्वा उभाभ्यां तदलक्षितः ताभ्यां मलक्षित इति॥ २६॥ ७॥ ऊद्धर्षं हृदयं यस्या अश्रैराविलेक्षिते हि॥ यस्य सः सवमव॥ २८॥ ईश्वरान् ईश्वरं तत्तुल्यांश्चेत्यर्थः॥ २९॥ प्रीणन् प्रीणयन्। संस्पृशन् संमर्दयन्॥ ३०॥ आत्मा वेत्त पिता। साक्षी वेकाशकः। स्वदृक् २८ पु

भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया। उभयोराविशत गेहमुभाभ्यां तदलक्षितः॥ २६॥ श्रोतुमप्यसतां दूराज्जनकः स्वगृहागतान्
आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः॥ २७॥ प्रवृद्धभक्त्या उद्धर्षहृदयास्राविलेक्षणः। नत्वा तदंघ्रीन्प्रक्षाल्य तदपो लोकपावनीः
२८॥ सकुटुंबो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान्। गंधमाल्यांबराकल्पधूपदीपार्घ्यगोवृषैः॥ २९॥ वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान्। पादा
वंकगतौ विष्णोः संस्पृशञ्छनकैर्मुदा॥ ३०॥ श्रीराजोवाच॥ भवान्हि सर्वभूतानामात्मा साक्षी स्वदृग्विभो। अथ नः त्वत्पदांभोजं स्मरतां दर्श
नंगतः॥ ३१॥ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान्। यदात्थैकांतभक्तान्मे नानंतः श्रीरजः प्रियः॥ ३२॥ को नु त्वच्चरणांभोजमेवंविद्विसृजेत्पुमा
न्। निःकिंचनानां शांतानां मुनीनां यस्त्वमात्मदः॥ ३३॥ योऽवतीर्य यदोर्वंशे नृणां संसरतामिह। यशो वितेने तच्छांत्यै त्रैलोक्यवृजिनापहं॥ ३४॥
नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे। नारायणाय ऋषये सुशांतं तप ईयुषे॥ ३५॥ दिनानि कतिचिद्भूमन्गृहान्नो निवस द्विजैः। समेतः पाद
रजसा पुनीहीदं निमेः कुलं॥ ३६॥ इत्युपामंत्रितो राज्ञा भगवांल्लोकभावनः। उवास कुर्वन्कल्याणं मिथिलानरयोषितां॥ ३७॥ ॥ ॥ ॥

स्वप्रकाशः। अथ अतः कारणात्॥ ३१॥ अनंतो बंधुरपि श्रीभार्यापि। अजः पुत्रोपि॥ ३२॥ ३३॥ तच्छांत्यै संसारोपशमाय॥ ३४॥ ३५॥ गृहान् गृहेष्वित्यर्थः॥ ३६॥ ३७॥ ॥ ॥ ॥

ह० उ० धुत्वश्परिधामयन् ॥ ३८ ॥ अवनिते अवनिनिजेप्रक्षालितवार ॥ ३९ ॥ ४० ॥ फलैरामलकादिभिरर्हणोनउशीरैः हस्ताविशेषमूलैः सुवासितैः शिवै [illegible] श्न
९९ वस्त्वाउभिरंबुभिः सुरभामृदा कस्तूरी प्रभुतयासपर्यया ऽजयायशोपपन्नया अनायासेनसंपन्नया। भूता उपहवलघत्वात्मत्वतिवर्हनंयदर्घः अत्रतेनव ॥ ४१ ॥ अस्पष्कस
स्यात्मा गर्वितत्समानिकेतैर्भूषुरैर्घ्यसर्वतीर्थास्पदपादरेणुभिः कृष्णादिभिर्यः संगमः सममकुतोवभूदितिविस्मये। यद्वा। आ हैति वितर्केन्तु इतिविस्मये ॥ ४२ ॥ उपस्थितःसमी ४६४३

कृतदेवोत्सुतंधामं स्वगृहाज्जनकोयथा। नत्वामुनीन्सुमंहशेधुत्वस्तान्सोननर्त्तेह ॥ ३८ ॥ तत्पापीठहृषिषेतानानीतेश्य वेश्मसः ॥ स्वागते
नाभिनंद्योद्री सभार्योवनिनेन्मुदा ॥ ३९ ॥ तदंभसामहाभाग आत्मानंस्वगृहान्वयं। स्नापयांचक्रउद्धर्षोलसन्सर्वमनोरथः ॥ ४० ॥ फलार्हणे
मुनिः२ शीरविरितास्रनाभंसाम्रदा सुरम्या तुलसीकुशांबुजैः। आराधयामासमयथोपपन्नयासपर्ययासत्वविनर्द्धनांधसा ॥ ४१ ॥ सतर्कयामासकुतोममान्व
यस्यगृहांधकूपेपतितस्यसंगमः। यःसर्वतीर्थास्पदपादरेणुभिः कृष्णेनवासात्मनिकेतभूसुरैः ॥ ४२ ॥ सूपविश्य सुखंतातिथ्यान्कृतदेवउपस्थि
तः। सभार्यःस्वजनापत्यउवाचांघ्र्यभिमर्शनः ॥ ४३ ॥ कृतदेवउवाच ॥ नाद्यनोदर्शनंप्राप्तः परंपरमपूरुष। यहीदंशक्तिभिः सृष्ट्वाप्रविष्टोह्यात्मस मिः२
त्तया ॥ ४४ ॥

पउपविष्टः भार्याभर्त्तव्याः स्वजनाअपत्यानियस्तैः सहितैः सहितः श्रीकृष्णस्यांघ्रिमभिमृशतिसंमर्द्दयतीतिअंघ्र्यभिमर्शनः ॥ ४३ ॥ यहींदंप्रविश्यस्तदैवदर्शनंप्राप्तइतिस
एवसन्मात्रोपहतनीश्नतस्वमित्यर्थः। यद्वा। नः अस्माकंअद्यैवप्राप्तइतिनकिंतुतदैवप्राप्तः यहींदंविश्वंस्वशक्तिभिःसत्वादिभिः सृष्ट्वास्वसत्तया ऽनुप्रविष्टस्त्वंदर्शनंउपरकं ९९
वलमद्यैवप्राप्तइति ॥ ४४ ॥

मायया सृष्टिप्रवेशयोरविद्या सृष्टिप्रवेशौ दृष्टांतनतया हायथेति। आत्ममायया स्वाविद्ययेत्यर्थः। यद्वा। आत्मनस्तव मायये ति॥४५॥ किंच। शृण्वतामिति। नित्यं श्रवणं कीर्त्त
नादि परायणानाममलात्मनामपि हृद्येव त्वं भासि। ममत्त्रु लोचनगोचरस्त्वं। अहोभाग्यमिति भावः॥४६॥ ननु सर्वेषां हृदिस्थितिः कथं केषांचिदेव हृदि भासि। मेदैः सूर्यवत्तमी
वोपाधिभिरंतरितत्वादिति यडुच्यते तर्हि न कस्यापि भायादित्यत आह। हृदिस्थोपीति। कर्मभिर्विक्षिप्तं चेतो येषां तेषामात्मशक्तिभिरहंकारादिभिरग्राह्यः। च्यवहितो विद्यपेतगु
णः। श्रवणकीर्त्तनादिसंस्कारश्शात्मार्थेतः करणं येषामंतिमसमीपे अव्यवहितस्त्वमित्यर्थः॥४७॥ एतदेवच्छपंचयन्नमस्यति नमोस्त्विति। नेतुध्यंनमोस्तु। अध्यात्मविदां निष्ठ

१८५

यथा शयानः पुरुषो मनसैवात्ममायया। सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासते॥४५॥ शृण्वतां गदतां शश्वदर्चतां त्वाभिवंदतां। नृणां सं
वदतामंतर्हृदि भास्यमलात्मनां॥४६॥ हृदिस्थोप्यतिदूरस्थः कर्मविक्षिप्तचेतसां। आत्मशक्तिभिरग्राह्योप्यंत्युपेतगुणात्मनां॥४७॥ नमो
स्तु तेध्यात्मविदां परात्मने ह्यनात्मने स्वात्मविभक्तमृत्यवे। सकारणाकारणलिंगमीयुषे स्वमायया संवृतरुद्धदृष्टये॥४८॥ ॥ ॥ ॥

त्वदेहाद्यहंकाराणां परमात्मने परमात्मत्वेन प्रकाशमानाय। मोक्षप्रदायेत्यर्थः। अनात्मने देहाद्यभिमानिने जीवाय परत्वेनाप्रकाशमानत्वात्तस्मात्मनः सकाशात्तद्विभक्त
त्वदेहाद्यहंकाराणां परमात्मने परमात्मत्वेन प्रकाशमानाय। मोक्षप्रदायेत्यर्थः।
:समर्पितो मृत्युः संसारो येन तस्मै। कुतः एतत्तत्राह। सकारणं महदादिकार्यं। अकारणं प्रकृतिः तदुभयलिंगस्वरूपाधिष्ठितृत्वमतया ईयुषे प्राप्तवते अतउभयनियंतुः स्वस्मा
त्सकाशात्तदुभयवश्यायजीवाय विभक्तमृत्यवे इत्यर्थः। नियंतृत्वनियम्यत्वे कारणं वदन्नाह। हे स्वमायया संवृतेति। अतो असुरेश्वर्यत्वात्सि पंचेतुध्यंनमः। किंच। रुद्धदृष्टये मा
यानिवारिकत्वं अन्येषां च रुद्धा दृष्टिर्येन तस्मै। यद्वा। स्वमायया स्वस्य संवृतानां अन्येषां च रुद्धा दृष्टिर्येन तस्मै इत्येकपदं॥४८॥ ॥

द॰उ॰ सएवंभूतः परमेश्वरस्त्वंनोस्मान्स्वभृत्यानृशाधिअनुशिक्षय ॥४९॥ ५०॥ संप्रिन्नादरमत्यधिकंब्राह्मणेषुमंदर्शयितुंलक्ष्मलोकसंग्रहपरोभगवान्नतोपिब्राह्मणेषु
१०० अनुग्रहातिरेकंकुर्वित्येवंतमनुशास्तिब्रह्मन्नितिसमभिः। मयासहविद्येन ॥५१॥ देवादिभ्योपिब्राह्मणाः श्रेष्ठा इत्याहदेवाइति। तेशनैः पुनंति एतेतुसद्यः। किंच। देवादी
निपत्तुतंपुनंतितदपिमहत्तमानामीक्षया ॥५२॥ ममकलापरिकलनंतुपालित्वयातुतः ॥५३॥ किंच। ब्राह्मणाराधनमेवममश्रेष्ठमित्याहनेति। हेतुत्तामाह। सर्ववेदमयोवि

सत्वंशाधिस्वभृत्यान्नः किंदेवकरवामते। एतदंतोनृणांक्लेशोयद्भवानक्षिगोचरः ॥४९॥ श्रीशुकउवाच ॥ तदुक्तमित्युपाकर्ण्यभगवा
न्प्रणतार्तिहा। गृहीत्वापाणिनापाणिंप्रहसंस्तमुवाचह ॥५०॥ श्रीभगवानुवाच ॥ ब्रह्मंस्तेनुग्रहार्थायसंप्राप्तान्विद्ध्यमून्मुनीन्। संचरं
तिमयालोकान्पुनंतः पादरेणुभिः ॥५१॥ देवाः क्षेत्राणितीर्थानिदर्शनस्पर्शनार्चनैः। शनैः पुनंतिकालेनतदप्यर्हत्तमेक्षया ॥५२॥ ब्राह्मणोजन्मनाश्रे
यान्सर्वेषांप्राणिनामिह। तपसाविद्ययातुष्ट्याकिमुमत्कलयायुतः ॥५३॥ नब्राह्मणान्मेदयितंरूपमेतच्चतुर्भुजं। सर्ववेदमयोविप्रः सर्वदेवम
योह्यहं ॥५४॥ दुःप्रज्ञाअविदित्वैवमवजानंत्यसूयवः। गुरुंमांविप्रमात्मानमर्चादाविज्यदृष्टयः ॥५५॥ चराचरमिदंविश्वंभावायेचास्यहेतवः। म
द्रूपाणीतिचेतस्याधत्तेविप्रोमदीक्षया ॥५६॥ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय। एवंचेदर्चितोस्म्यद्धानान्यथाभूरिभूतिभिः ॥५७॥
श्रीशुकउवाच ॥ सइत्थंप्रभुणादिष्टः सहकृष्णान्द्विजोत्तमान्। आराध्यैकात्मभावेनमैथिलश्चापसद्गतिं ॥५८॥ एवंस्वभक्तयोराजन्भगवान्भ
क्तभक्तिमान्। उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगात् ॥५९॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषडशीतितमोध्यायः ॥ ॥ ॥

प्रदिष्टइति। प्रमाणाधीनत्वात्तत्रमेयस्य। वेदमयोविप्रोदेवमयाश्चस्मान्द्रूपात्प्रेष्ठइत्यर्थः ॥५४॥ अस्यएवंदोषदृष्ट्याः इज्यदृष्ट्यः प्रतिमादृष्टयः ॥५५॥ अस्यविश्वस्यहे
तवोभावाः महदादयः। मदीक्षयाममैवसर्वरूपाणि ॥५६॥ सन्मार्गंतत्त्वंवेदान्तविकांउतविषयाणांब्रह्मनिष्ठकारमादिश्य ॥५९॥ दशमेषडशीतितमः ॥ ॥

यस्याहमनुगृह्णामीति अयमर्थः। यो विषयान् परिजिहीर्षुरपि कथंचिद्विषयमानेषु सक्तस्तेन क्लिश्यति तस्य विषयापहारेणानुग्रहः इति। यथाक्तस्येक वादीनामैश्वर्यविरोधात्। अथवा
अयमर्थः विभूतीः काममनानुरूपा दत्वा शनैः विषयभोगाद्वमानेन तस्य निर्वेदं संपाद्य हरिष्यामि परमानुग्रहं करिष्यामीति तदुक्तं भागवते वा। नमस्यान्वेशितधियां कामः कामाय कल्पते इति। डः

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः। शृण्वन्भगवतो धर्मानपृच्छदिदमच्युतं॥६॥ स आह भगवांस्तस्मै प्रीतः शुश्रूषवे प्रभुः। नृणां निःश्रेय
सार्थाय योऽवतीर्णो यदोः कुले॥७॥ श्रीभगवानुवाच॥ यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः। ततोऽधनं त्यजंत्यस्य स्वजना दुःखदुःखि
तं॥८॥ स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया। मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहं॥९॥ तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनंतकं। अ
तो मां सुदुराराध्यं हित्वान्यान्भजते जनः॥१०॥ ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः। मत्ताः प्रमत्ता वरदान्विस्मयंत्यवजान
ते॥११॥ ऋषिरुवाच॥ शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः। सद्यः शापप्रसादोऽङ्ग शिवो ब्रह्मा न चाच्युतः॥१२॥ अत्रैवोदाहरंतीम
मितिहासं पुरातनं। वृकासुराय गिरिशो वरं दत्वाप संकटं॥१३॥ ॥

त्वादनु पुनर्दुःखितमिव पश्यतीयमानमित्यर्थः॥८॥ स पुनः वंचनामायहेणाधनेहया प्रवृत्तोपि मदनुग्रहेण यदा निःफलोद्यमो निर्विण्णः स्यात् तदा मदनुग्रहमिति ममासाधा
रणमनुग्रहं॥९॥ तमेवाह तत्तद्ब्रह्मेति। अतः पश्चादपि मोक्षमरोचयन्नन्यानाश्रयति जनः स्पर्धः॥१०॥ एतदेवेतिहासेन स्पष्टयितुमाह। शापप्रसादयोरिति। ब्रह्मादेस्तु वयः॥११॥१२॥

स्कं

द॰उ॰ शकुनेः पुत्रः ॥ १४ ॥ ५ ॥ सुसंकरमापाकैलासोमारनंतुरयालनेव ॥ १६ ॥ सगात्रनतउपाधावता । कथंआत्मकथेऽणखमांसेनतुष्टानइति ॥ १७ ॥ अहृष्वतच्छेत्तुस्तुद्यतः ॥ १९ ॥ स्मर्ति

११९ मानप्रिविदेहीप्यमानः । वयंअधुनातनायथ्याकंचित्दुःखेनमर्तुकामं वारयामः । नतद्दितिा । सचतउपलक्षतालतिः परिशार्दिदेहोभवता । सवारयत ॥ २० ॥ एवमाहरवा । येनापि

वृकोनामासुरः पुत्रः शकुनेः पथिनारदाद्दृष्ट्वासुतोषं परस्तुदेवेषुत्रिषु दुर्मतिः ॥ १४ ॥ सआहदेवं गिरिशमुपाधावाशु सिध्यसि । यो

ल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥ १५ ॥ दशास्यबाणयोस्तुष्टः स्तुवतो वंदिनोरिव । ऐश्वर्यमतुलं दत्वा ततआपसुसंकटं ॥ १६ ॥ इ

त्यादिष्टस्तमसुरउपाधावत्स्वगात्रतः । केदारआत्मक्रव्येण जुह्वानोग्निमुखं हरं ॥ १७ ॥ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेहनि । शिरोवृश्च

त्स्वधितिना तत्तीर्थक्लिन्नमूर्द्धजं ॥ १८ ॥ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोनलात् । निगृह्य दोर्भ्यां भुजयोर्न्यवारयत

तत्स्पर्शनाद्भूयउपस्कृताकृतिः ॥ १९ ॥ तमाहचांगालमलं वृणीष्व मे यथाभिकामं वितरामि ते वरं । प्रीयेय तोयेन नृणां प्रपद्यतामहं त्वयात्मा

नुशामर्द्यतेवृथा ॥ २० ॥ देवं सवव्रे पापीयान्वरं भूतभयावहं । यस्ययस्य करं शीर्ष्णि धास्ये स म्रियतामिति ॥ २१ ॥ तच्छ्रुत्वा भगवान्रुद्रो दुर्म

नाइवभारत । ओमिति प्रहसंस्तस्मै ददेहेरमृतं यथा ॥ २२ ॥ सतद्वरः सोपरीक्षन्न गौरीहरणलालसः । सतद्वरपरीक्षार्थं शंभोर्मूर्द्धि किलासु

रः स्वहस्तं धातुमारेभे सोबिभ्यत्स्वकृताच्छिवः ॥ २३ ॥ तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः । यावदंतं दिवो भूमेः काष्ठानामुदगादुदक् ॥ २४ ॥

मजतांश्रीतःस्यां । त्वयात्तुदेहोहयापीद्यतइति ॥ २० ॥ १ ॥ दातुर्मर्ममर्थमपिदं नवानुसप्योपदीशमिव ॥ २३ ॥ उपसृष्टः अनुगतः सन् उदगात् अवधावत । उदक् उत्तरतः ॥ २४ ॥ ११९

वैकुंठं श्वेतद्वीपं ॥२५॥ तेरकाश्वरांतथा यमनंताहङ्क यमनंयसतो इति जिनाईनः दुःखहंता ॥२७॥ मेखलादिभिरुपलक्षितः प्रस्तुरियात्सन्मुखमागतः ॥२८॥ यत्कांनिश्चि
तं किमर्थं । आत्मा देहः सर्वपुरुषार्थहेतुः । अतो मा पीडयेति ॥२९॥ प्रायशः पुंभिर्धृतैर्भवान् स्वार्थं समीहते स्म क्षपयितुमिच्छति । अथवा जनः पुंभिः सहायैः स्वकार्याणि साध

अतानंतः इति विचिंत्य सौमाम सुरेश्वरः । ततो वैकुंठमगमत्भास्वरं तमसः परं ॥२५॥ यत्र नारायणः साक्षान्न्यासिनां परमागतिः । शां
तानां न्यस्तदंडानां यतो नावर्त्तते गतः ॥२६॥ तं तथा व्यसनं दृष्ट्वा भगवान्वृजिनार्दनः । दूरात्प्रत्युदियात्भूत्वा वटुको योगमायया ॥२७॥
मेखलाजिनदंडाक्षैस्तेजसाग्निरिव ज्वलन् । अभिवादयामास च तं कुशपाणिर्विनीतवत् ॥२८॥ श्रीभगवानुवाच ॥ शाकुनेय भवा
न्व्यक्तं श्रांतः किं दूरमागतः । क्षणं विश्रम्यतां पुंस आत्मायं सर्वकामधुक् ॥२९॥ यदि नः श्रवणायालं युष्मद्व्यवसितं विभो । भण्यतां प्रा
यशः पुंभिर्धृतैः स्वार्थान्समीहते ॥३०॥ श्रीशुक उवाच ॥ एवं भगवता पृष्टो वचसामृतवर्षिणा । गतक्लमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठि
तम् ॥३१॥ श्रीभगवानुवाच ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि । यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥३२॥ यदि वस्त
त्र विश्रंभो दानवेंद्र जगद्गुरौ । तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां ॥३३॥ यद्यसत्यं वचः शंभोः कथंचिद्दानवर्षभ । तदैनं जह्यसद्वा
चं न यद्वक्तानृतं पुनः ॥३४॥ इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः । भिन्नधीर्विस्मृतः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् ॥३५॥ ॥ ॥

यति । अतो नः कथ्यतामिति ॥३०॥ पैशाच्यं पिशाचानामिव वृत्तिं ॥३२॥ ३॥ यत्पूर्वं वक्ता वदिष्यति ॥३४॥ चित्रैर्धार्मिकैः सुपेशलैः अतिरम्यैः भिन्नधीः भ्रंशितमतिः ॥३५॥

द॰ उ॰ ॥३८॥ किं स्तुवत्कार्यं विश्वेशे त्वयि कृतागाः कृतापराध इति ॥३९॥ अव्याकृतशक्त्युदन्वतः वाङ्मनसागोचरशक्तिसमुद्रस्य । गिरित्रमोक्षं शिवमोचनरूपं चरित्रं सं-
१२० सृतिभिर्नानाहृपसंसारैः ॥४०॥ ॥इति दशमे ऽशीतितमः ॥ ॥ नवाशीतितमे देवः को महानिति संशये । परीक्ष्य विष्णोरुत्कर्षं स्तुतिर्भ्यो ऽवर्णयन्मुनः । इतिहासं तरमा

अथापतद्भिन्नशिरा वज्राहत इव क्षणात् । जयशब्दो नमःशब्दः साधुशब्दोऽभवद्दिवि ॥३६॥ मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे । देव-
र्षिपितृगन्धर्वा मोचितः संकटाच्छिवः ॥३७॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः । अहो देव महादेव पापोऽयं स्वेन पाप्मना ॥३८॥ हतः क-
को नु महत्स्वीश जन्तुर्वै कृतकिल्बिषः । क्षेमी स्यात्किमु विश्वेशे कृतागस्को जगद्गुरौ ॥३९॥ य एवमव्याकृतशक्त्युदन्वतः परस्य सा-
क्षात्परमात्मनो हरेः । गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथारिभिः ॥४०॥ इति श्रीभागवते महापुराणे दशम-
स्कंधे वृकासुरमोक्षणं नामाशीतितमोऽध्यायः ॥ श्रीशुक उवाच ॥ सरस्वत्यास्तटे राजन्नृषयः सत्रमासत । वितर्कः समभूत्तेषां त्रिष्वधी-
शेषु को महान् ॥ ॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप । तज्ज्ञप्त्यै प्रेषयामासुः सोऽभ्यगाद्ब्रह्मणः सभाम् ॥१॥ न तस्मै प्रह्वणं स्तोत्रं च-
क्रे सत्त्वपरीक्षया । तस्मै चुक्रोध भगवान्प्रज्वलन्स्वेन तेजसा ॥३॥ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः । अशीशमद्यथा वन्
हिं स्वयोन्या वारिणा प्रभुः ॥४॥ ॥

हा सरस्वत्या इति ॥१॥२॥ स्वयोन्या स्वस्मै उदकरूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येणेत्यर्थः । तेन यथा कश्चिद्वह्निं शमयति । तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं श- १२०
मयामासेत्यर्थः ॥४॥

॥१०॥ तीर्थकारिणा तीर्थत्वनिमित्तेन ॥११॥१२॥ तस्य मंद्रया गंभीरया गिरा निर्वृतस्तूष्णीं बभूवेति शेषः ॥१३॥१४॥ विस्मिता अपराधातिरेकेऽपि निर्विकारत्वेन भूयांसं श्रद्दधुः महत्त्वमतिविश्व
सवंतः यतः यस्मित्र ॥१५॥ वैराग्यं च चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यं। विषयांस्सक्तमशक्तुवतो पि ममानेच्छात्यागो नामाद्यं वैराग्यं। ततो विषयाणां मध्ये तवणादिव्य

ततः कैलासमगमन्नतमतं देवो महेश्वरः॥ परिरब्धुं समारेभ उत्थाय भ्रातरं मुदा। नेच्छत्त्वमसुत्पथगा इति देवश्चुकोप ह ॥५॥ शूलमुद्यम्य तं हंतु
मारेभे तिग्मलोचनः। पतित्वा पादयोर्देवी सांत्वयामास तं गिरा ॥६॥ अथो जगाम वैकुंठं यत्र देवो जनार्दनः। शयानं श्रिय उत्संगे पदा वक्षस्यताड
यत ॥७॥ तत उत्थाय भगवान्सह लक्ष्म्या सतां गतिः। स्वतल्पादवरुह्याथ ननाम शिरसा मुनिं ॥८॥ आह ते स्वागतं ब्रह्मन्निषीदात्रासने क्षणं। अजानता
मामागतान्वः क्षंतुमर्हथ नः प्रभो ॥९॥ अतीव कोमलौ तात चरणौ ते महामुने॥ इत्युक्त्वा विप्रचरणौ मर्दयन्स्वेन पाणिना ॥१०॥ पुनीहि सह लोकं
मां लोकपालांश्च मद्गतान्। पादोदकेन भवतस्तीर्थानां तीर्थकारिणा ॥११॥ अद्याहं भगवँल्लक्ष्म्या आसमेकान्तभाजनं। वत्स्यत्युरसि मे भूतिर्भवत्पाद
हतांहसः ॥१२॥ श्रीशुक उवाच॥ एवं ब्रुवति वैकुंठे भृगुस्तन्मंद्रया गिरा। निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठोऽश्रुलोचनः ॥१३॥ पुनश्च सत्रमाव्रज्य मु
नीनां ब्रह्मवादिनां। स्वानुभूतमशेषेण राजन्भृगुरवर्णयत ॥१४॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः। भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतोऽभ
यं ॥१५॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितं। ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहं ॥१६॥

तिरेकाणापि हन्त्रिर्हिमी यां नयाद्बना वपि मनसि रागशैथिल्येन वा त्योरिंद्रियैरेव विषयसेवनं तत्तीयां तज्ज्ञाप्यौदासीन्यं चतुर्थं तथाऽऽहुः वैराग्यमाद्यं यतमानसंज्ञं व्यतिरिक्तागो
व्यतिरेकसंज्ञं एकेंद्रियाख्यं हृदि रागमोक्षमौत्सुक्यं तस्यापि भावस्य वशीकृताख्यमिति ॥१६॥ ॥

द.उ. ॥१७॥ यस्य भावतएव ॥१८॥ यद्यपि त्रिविधा आकृतयः । ततस्तासु सत्वमेव तीर्थसाधनं तु रुषार्थ हेतुः ॥१९॥ इत्थं निशम्य त्यासरस्वतीतीरवासिनो विप्राः हरिसेवयास्तु किं प्राप्नुहिति ॥२०॥
१२१ याम नंदनस्य सुरवे पंकजाडहनगंधयुक्तं पीयूषयुल्यं हरेः । प्रशस्तं यशोयः संसारीसेवते सयुक्तो भवतीति ॥२१॥ सवोक्त लक्षणो भगवाश्च कृष्ण एवेति दर्शयितुमाख्यानांतरमाह

मुनीनां महतां दृष्टानां शांतानां समवेतसां अकिंचनानां साधूनां यमाहुः परमां गतिं ॥१७॥ सत्वं यस्य प्रिया मूर्तिर्ब्राह्मणास्त्विष्टदेवताः । भजंतं सना
शिषः शांता यं वा निपुणबुद्धयः ॥१८॥ त्रिविधाकृतयस्तस्य राक्षसा असुराः सुराः । गुणिन्या मायया सृष्टाः सत्वं तत्तीर्थसाधनं ॥१९॥ ॥ श्रीसूत उवाच
एवं सारस्वता विप्रा नृणां संशयनुत्तये । पुरुषस्य पदांभोजसेवया तद्गतिं गताः ॥२०॥ ॥ सूत उवाच ॥ ॥ इत्येतन्मुनितनयास्यपद्मगंधपीयूषं भवभ
यभित्परस्य पुंसः । सुश्लोक्यं श्रवणपुटैः । पिबत्यभीक्ष्णं पांथोध्वभ्रमणपरिश्रमं जहाति ॥२१॥ ॥ शुक उवाच ॥ एकदा द्वारवत्यां तु विप्रपत्न्याः
कुमारकः । जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ॥२२॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः । इदं प्रोवाच विलपन्नातुरो दीनमानसः ॥२३॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः । क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोर्भकः ॥२४॥ हिंसाविहारं नृपतिं दुःशीलमजितेंद्रियं प्र
जा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः ॥२५॥ एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च । विसृज्य स नृपद्वारि तां गाथां समगायत ॥२६॥ तामर्जुन उप
श्रुत्य कर्हिचित्केशवांतिके । परेते नवमे बाले ब्राह्मणं समभाषत ॥२७॥ किंस्विद्ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः । राजन्यबंधुरेते वै ब्राह्मणाः सत्रमासते ॥ रवै २१
॥२८॥
एक देति ॥२२॥ प ब्रह्मद्विष इत्यादिकां तां गाथां वाक्यं समगिनक श्चिद्दोषः अतो राजदोषेणैव मम सुत्राप्रियंत इति वारंवारं उक्रोशेत्यर्थः ॥२६॥ ७॥ ब्रह्मन् किंस्विदिति कि
मर्थं हृदयारोदिषि । यन्मन्निवासे धनुर्धरमात्रो राजन्यबंधुरपि । नास्ति ब्राह्मणस्य तु कावार्ता । एते तु सत्रेयागे इव ब्राह्मणा मिलिता भवितुमर्हंतीत्यर्थः ॥२८॥ ॥ ॥ १२१

तदेवाह धनदारात्मजा एकाशना धनादिभिर्विमुक्ताः । यत्र येषु जीवत्सु शोचंति जीवंति केवलं जीविकां संपादयंति ॥१९॥ हतकल्मषइति । अग्निप्रवेशेन ब्राह्मणाविलापश्च व
णपातकात्तेनो भवेयमित्यर्थः । अहतकल्मषश्चेदितिवा ॥२०॥ १ ॥ न श्रद्दध्महे न संप्रतीमः ॥२२॥ ४ ॥ एवं श्रोत्रियाद्वैर्विश्रंभितः विश्वासं प्रापितः । निशामयन्नाकर्णयन् एव इ ॥२५॥ ह

धनदारात्मजाः शक्ता यत्र शोचंति ब्राह्मणाः । ते वै राजन्यवेषेण नराजीवंत्यसंभराः ॥१९॥ अहं प्रजानां भगवन् रक्षिता ऽस्मि दीनपोरिह । अनिस्तीर्णप्रतिज्ञो
ऽग्निं प्रवेक्ष्ये हतकल्मषः ॥२०॥ ब्राह्मण उवाच ॥ संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः । अनिरुद्धो ऽप्रतिरथो न त्रातुं शक्नुवंति यत् ॥२१॥ तत्कथं नु भ
वान् कर्म दुःकरं गदीश्वरैः । विकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयं ॥२२॥ अर्जुन उवाच ॥ नाहं संकर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव वा । अहं वा
अर्जुनो नाम गांडीवं यस्य वै धनुः ॥२३॥ मावमंस्था मम ब्रह्मन् वीर्यं त्र्यंबकतोषणं । मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ॥२४॥ एवं विश्रंभितो
विप्रः फाल्गुनेन परंतप । जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ॥२५॥ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः । पाहि पाहि प्रजां मृत्योरित्याहार्जु
नमातुरः ॥२६॥ स उपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरं । दिव्यान्यस्त्राणि संस्मृत्य सज्यं गांडीवमाददे ॥२७॥ [illegible] न्यरुणत्सूतिकागारं शरै
र्नानास्त्रयोजितैः । तिर्यगूर्द्ध्वमधः पार्थश्चकार शरपंजरं ॥२८॥ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः । सद्यो ऽदर्शनमापेदे सशरीरो विहायसा
॥२९॥

ब्राह्मणोपेक्षकत्वेन कस्मावज्ञया महेश्वरं नमस्कृत्य ॥२७॥ न्यरुणत् आवृतवान् तदेवाह । तिर्यगूर्द्ध्वमिति ॥२८॥ अदर्शनमापेदे देहोपि नावशिष्ट इत्यर्थः ॥२९॥ ॥ ॥

द०उ० ॥४०॥ यस्य प्रजाः तत्त्रातव्या ॥४१॥ प्रत्युक्तः वारितः। उपपत्तिभिः प्रतिषेधं कुर्वता ॥४५॥ मावज्ञ मावजानीहि ये निंदंति त एव मनुष्याः नः कीर्तिं स्थापयिष्यंति निश्वकां करिष्यंति पाठांतरं

१२२ हे दो भंगाभयादागं तुकमिति ॥४६॥ ७ ॥ सप्त सप्त संख्या गिरयो येषु द्वीपेषु तान् ॥४८॥ ५०॥ कृतमिति प्रकृतिपरिणाम महत्पं ना लोकालोकमात्रं ॥५१॥ चक्रानुपथेन चक्रमनुगतेन द्वा

तदाह विप्रो विजयं विनिंदन् कृष्णस्य संनिधौ। मौढ्यं पश्यत मे योहं श्रद्दधे क्लीवकत्थनं ॥४०॥ न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः। यस्य शेकुः परित्रा

तुं कोन्यस्तदवितेश्वरः ॥४१॥ धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः। दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥४२॥ एवं शपति विप्रर्षौ विद्यामा

स्थाय फाल्गुनः। ययौ संयमनीमाशु यत्रास्ते भगवान्यमः ॥४३॥ विप्रापत्यमचक्षाणस्तत ऐंद्रीमगात्पुरीं। आग्नेयीं नैरृतीं सौम्यां वायव्यां वारुणी

मथ। रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥४४॥ ततोऽलब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रुतः। अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ॥४५॥

दर्शये द्विजसूनूंस्ते मावज्ञात्मानमात्मना। ये ते हि कीर्तिं विमलां मनुष्याः स्थापयिष्यंति ॥४६॥ इति संभाष्य भगवानर्जुनेन सहेश्वरः। दिव्यं स्वर

थमास्थाय प्रतीचीं दिशमाविशत् ॥४७॥ सप्त द्वीपान्सप्त सिंधूंस्सप्त सप्त गिरीनथ। लोकालोकं तथातीत्य विवेश सुमहत्तमः ॥४८॥ तत्राश्वाः शै

ब्यसुग्रीवमेघपुष्पबलाहकाः। तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥४९॥ तान्दृष्ट्वा भगवान्कृष्णो महायोगेश्वरेश्वरः। सहस्रादित्यसंकाशं स्वच

क्रं प्राहिणोत्पुरः ॥५०॥ तमः सुघोरं गहनं कृतं महद्विदारयद्भूरितरेण रोचिषा। मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा चमूः॥

५१॥ द्वारेण चक्रानुपथेन तत्तमः परं परं ज्योतिरनंतपारं। समश्नुवानं प्रसमीक्ष्य फाल्गुनः प्रताडिताक्षो पिदधेक्षिणी उभे ॥५२॥ ॥ ॥४॥ ॥ ॥

रेण। तत्तमः परं तस्मात्तमसः परं॥ हरेर्वर्त्तमानं। परं त्रैगुण्यं भागवतं ज्योतिः समश्नुवानं व्याप्नुवत्। प्रसमीक्ष्य प्रताडिताक्षो नेत्रे समपिदधदिति ॥५२॥ ॥ ॥४॥ ॥ ॥ ॥ ॥ १२२

एजंतः उच्छलंतः बृहंतः महांतः ऊर्मयो भूषणं यस्य तत् । तच्च सलिलं भवनं महाकालपुरं द्युमत्तमं द्युतिमत्सु श्रेष्ठं ॥५३॥ सहस्रमूर्द्धभवाः फणाः तासु मणयः तेषां द्युतिभिः । द्वि
सहस्रनेत्रैरुज्ज्वलं । स्फटिकगिरिसंकाशं । शितिकंठजिह्वं कंठाश्च जिह्वाश्च शितयः नीलाः कंठजिह्वा यस्य तं ॥५४॥ तद्भोग एव सुखासनं तस्य तं तत्स्य भोगो देहः सुखेक स्नाममनं यस्य

ततः प्रविष्टः सलिलं नभस्वता बलीयसैजद्बृहदूर्मिभूषणं । तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशोभितं ॥५३॥ तस्मिन्महाभीमम
नंतमद्भुतं सहस्रमूर्द्धन्यफणामणिद्युभिः । विभ्राजमानं द्विगुणेक्षणोल्वणं सिताचलाभं शितिकंठजिह्वं ॥५४॥ ददर्श तद्भोगसुखासनं विभुं महा ३
नुभावं पुरुषोत्तमोत्तमं । सांद्रांबुदाभं सुपिशंगवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणं ॥५५॥ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुं
तलं । प्रलंबचार्वष्टभुजं सकौस्तुभं श्रीवत्सलक्ष्मं वनमालयावृतं ॥५६॥ सुनंदनंदप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः । पुष्ट्या श्रिया
कीर्त्यजयाखिलर्द्धिभिर्निषेव्यमानं परमेष्ठिनां पतिं ॥५७॥ ववंद आत्मानमनंतमच्युतो जिष्णुश्च तद्दर्शनजातसाध्वसः । तावाह भूमा परमेष्ठिनां
प्रभुर्बद्धांजली सस्मितमूर्जया गिरा ॥५८॥ ॥

तं ॥५५॥ महांतो मणिव्राता येषु तेषां किरीटकुंडलानां प्रभा तया परिक्षिप्ताः सर्वतः स्फुरंतः सहस्रमपरिमिताः कुंतला यस्य तं ॥५६॥ कीर्त्यजया कीर्तिसहिता अजया । अखिल
र्द्धिभिरणिमादिविभूतिभिः मूर्तिधराभिः ॥५७॥ ऊर्जितया गिरा ॥५८॥ ॥

द॰उ॰ मेकलावतीर्णाविति मिरं बोधनं। शीघ्रं मे अंतिमकाशं ततं आगन्तुं ॥५९॥ आचरतां आचरत। इदंतु भारतयुद्धात् सर्वमेव कृतनमपि श्रेष्ठ कथनप्रस्तावे नाक्षेपं ॥६०॥ इति द

१२३

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये। कलावतीर्णाववनेर्भरासुरान्हत्वेह भूयस्त्वरयेतमंतिमे ॥५८॥ पूर्णकामावपि
युवां नरनारायणावृषी। धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं ॥६०॥ इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिना। ॐ मित्यानम्य भूमानमादाय
द्विजदारकान् ॥६१॥ न्यवर्त्ततां स्वकं धाम संप्रहृष्टौ यथागतं। विप्राय ददतुः पुत्रान्यथारूपं यथावयः ॥६२॥ निशम्य वैष्णवं धाम पार्थः परम
विस्मितः। यत्किंचित्पौरुषं पुंसां मेने कृष्णानुकंपितं ॥६३॥ इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन्। बुभुजे विषयान्ग्राम्यानीजे चात्यूर्जि
तैर्मखैः ॥६४॥ प्रववर्षाखिलान्कामान्प्रजासु ब्राह्मणादिषु। यथाकालं यथैवेंद्रो भगवान् श्रैष्ठ्यमास्थितः ॥६५॥ हत्वा नृपानधर्मिष्ठान्घा
तयित्वार्जुनादिभिः। अंजसा वर्त्तयामास धर्मं धर्मसुतादिभिः ॥६६॥ ॥इति श्रीभागवते महापुराणे दशमस्कंधे द्विजकुमाराहरणं नाम नवा
शीतितमोध्यायः ॥ ॥श्रीशुक उवाच॥ ॥सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः पतिः। सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः ॥१॥ ॥ ॥

शमे एकोननवतितमोध्यायः ॥॥ वरमेतु उनः प्रोक्ता कृष्णलीला समासतः। यदुवंशप्रसूनानामानंत्यं च समकारणं। श्रीकृष्णविभूतिं समासेन दर्शयति। सुखं स्वपुर्यामिति १२३
सर्वसंपदादिविशिष्टायां ॥१॥

॥४॥ श्रियः पतिः षोडशसहस्रपत्नीनामेकवल्लभः स रत्नसांगेहेषु रेमे रत्नद्वयः ॥५॥ गेहविशेषणं शोभत्कुल्लेत्यादि श्लोकेन ॥६॥ तथा ह्रदिनीषु च अंभोविगाह्य विजह
रा महानुदयो वैभवं यस्य सः । योषितां कुचकुंकुमैर्लिप्तांगः । यतस्ताभिः परिरब्धः ॥७॥ सूतमागधवंदिभिर्वा उपगीयमानः ॥८॥ ॥९॥ ता क्लिन्नवस्त्राः अत एव विवृतोरुकुचप्रदेशा

स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः । कंदुकादिभिर्हर्म्येषु क्रीडंतीभिस्तडित्त्विषुभिः ॥२॥ नित्यं संकुलमार्गायां मदच्युतभिर्मतंगजैः । स्वलंकृ
तैर्भटैरश्वैः रथैश्च कनकोज्ज्वलैः ॥३॥ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु । निर्विशद्भृंगविहंगैर्नादितायां समंततः ॥४॥ रेमे षोडशसाहस्रप
त्नीनामेकवल्लभः । तावद्विचित्ररूपोसौ तद्गेहेषु महर्द्धिषु ॥५॥ प्रोत्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः । वासितामलतोयेषु कूजद्द्विज
कुलेषु च ॥६॥ विजहार विगाह्यांभो ह्रदिनीषु महोदयः । कुचकुंकुमलिप्तांगः परिरब्धश्च योषिताम् ॥७॥ उपगीयमानो गंधर्वैर्मृदंगपणा
वानकाश्च नादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ॥८॥ सिच्यमानोच्युतस्ताभिर्हसंतीभिः स्म रेचकैः । प्रतिसिंचन् विचिक्रीडे यक्षीभिर्यक्ष
राडिव ॥९॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचंत्य उद्धृतबृहत्कबराप्रसूनाः । कांतं स्म रेचकजिहीर्षयोपगुह्य जातस्मरोत्सवलसद्वद
नाविरेजुः ॥१०॥

॥ उद्धृतानि विवृतानि ऊरु बृहत्कबरेभ्यः उद्धृतानि यासां ताः । जातेन स्मरेण य उत्सवः तेन लसंति वदनानि यासां ताः ॥१०॥ ॥ रामायनमः ॥ ॥ ॥ ॥

र•उ० तासां त्वनेनमोविषज्जितकुंकुमास्वप्नस्पृशः। क्रीडायाः अभिषंगेण अभिनिवेशेन क्षुतः कंपितः कुंतलरदवंधो यस्याः सः ॥११॥२॥ सुक्तं देकधियः समाहिता स्वदनामगि
१२४ रः सत्यः पुनस्त्वमेवेशं चिंतयं सो जडं यथा भवतितथा यानि वाक्यानि ऊचुस्तानि मेमत्तो गदतः शृणुवित्यर्थः ॥१४॥ ईश्वरः श्रीकृष्णः स्वपितिस्त्वंतु निद्राभंगं कुर्वती विलप
सि। न शोषेन स्त्रियोपिषिनद्दस्तुवितामित्यर्थः। अथवा नापरा धनस्वापीत्या शयेनाहुः। नलिननयनसहासेनसहितं उदारयस्त्रीलेक्षितं तेन कश्चिद्धर्दनिर्विद्धचेताः स्वमि

कृष्णस्त्वनात्तन विषज्जितकुंकुमस्रक्क्रीडाभिषंगधुतकुंतलरदवंधः। सिंचन्मुहुर्युवतिभिः प्रतिषिच्यमानो रेमेकरेणुभिरिवेभपतिः प
रीतः ॥११॥ नटानां नर्तकीनां च गीतवाद्योपजीविनाम्। क्रीडालंकारवासांसि कृष्णोदात्तस्य च स्त्रियः ॥१३॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मि
तैः। नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां किल हृता धियः ॥१३॥ ऊचुर्मुकुंदैकधियो गिरउन्मत्तवज्जडं। चिंतयंत्योरविंदाक्षं तानि मे गदतः शृणु ॥१४॥
महिष्यऊचुः ॥ कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः। वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननयन
हासोदारलीलेक्षितेन ॥१५॥ नेत्रे निमीलयसि नक्तमदृष्टबंधुस्त्वं रोरवीषि करुणं बत चक्रवाकि। दास्यं गता वयमिवाच्युतपादजुष्टां किंवा स्रजं
स्पृहयसे कवरेण वोढुं ॥१६॥ भो भोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोधिगतप्रजागरः। किं वा मुकुंदापहृतात्मलांछनः प्राप्तां दशां त्वं च गतो दुरत्य
याम् ॥१७॥

ति ॥१५॥ नक्तं रात्रावदृष्टबंधुः सती रोरवीषि किं वा नेतावतत्रापि तु वयमिव स्पृहयसे ॥१६॥ अलब्धनिद्रः सदा निष्टनसे क्रोशसि। किं वा अस्माभिः प्राप्तां दशां त्वमपि ग १२४
तोसि। अहो कष्टं। यथा वयं संभोगेन मुकुंदापहृतं कुंकुमादि लांछनाः तथा त्वमपि यतोपहृतश्रीकौस्तुभादिलांछनो लक्ष्यसे ॥१७॥

सुकुंदगादिना निरहस्यानि विस्मर्यतदेकचिंतया कश्चित्स्वं स्त्रीगोऽसि। वयमिव स्थगितनगीस्तनुवाक्या हे इंदो मत्तसौ यै वोपलसमे ॥१८॥ अप्रिया चरणां विना स्मरो दीरणो न
च्यया जननं मलयानिलतताचनुचितमित्यर्थः ॥१९॥ मेघेति। आ तयान्निहरणादिसामामा त्वं यादवेंद्रस्य नूनं दयितः स त्वामिश्रतो भवास्तं ध्यायति। ध्याने लिंगमाह ऊः अ
त्युत्कंठऽस्मादि। अहो किमिति त्वया तेन सख्यं कृतं यतो दुःखदस्तस्य संगमति ॥२०॥ हे कोकिल प्रियराव स प्रियं वदस्य श्रीकृष्णस्य पदानी वपदानि शब्दानूनं भाषसे। स्वता

त्वं यक्ष्मणा बलवतासि गृहीत इंदो क्षीणस्तमो। न निजदीधितिभिः क्षिणोषि। कच्चिन्मुकुंदगदितानि यथा वयं त्वं विस्मृत्य भोः स्थगितगी
रुपलक्ष्यसे नः ॥१८॥ किं त्वाचरितमस्माभिर्मलयानिल तेऽप्रियं। गोविंदापांगनिर्भिन्ने हृदीरयसि नः स्मरं ॥१९॥ मेघश्रीमस्त्वमसि दयितो
यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवान्ध्यायति प्रेमबद्धः। अत्युत्कंठः शवलहृदयोऽस्मद्विधो बाष्पधाराः। स्मृत्वा स्मृत्वा विसृजसि मु
हुर्दुःखदस्तत्प्रसंगः ॥२०॥ प्रियराव पदानि भाषसे मृतसंजीविकयाऽनया गिरा। करवाणि किमद्य ते प्रियं वद मे वल्गितकंठ कोकिल ॥२१॥
न चलसि न वदस्युदारबुद्धे क्षितिधर चिंतयसे महांतमर्थं। अपि बत वसुदेवनंदनांघ्रिं वयमिव कामयसे स्तनैर्विधर्त्तुं ॥ ॥२२॥ ॥ ॥
स्य

मृतसंजीवयसीति तथा। नया कोमलया गिरा। वल्गितकंठ रमणीयकंठ। हे कथय किं तव प्रियं करवाणीति ॥२१॥ हे क्षितिधर त्वं न वदसि न चलसि अतो नूनं महां
तमर्थं चिंतयसे वक्तन तर्हि अपि किं यथा स्तनैर्विधर्त्तुं वयं कामयामहे तथा त्वं स्तनतुल्यैः शृंगैर्वाऽङ्कामयसे। ओमिति चेन्न हि तदाप्यस्मदवस्था भविष्यतीति भावः ॥२२॥

द० उ० मो मिंधुपत्न्याः नद्याः मध्ये प्रतियो भे मिंधुर्मेवद्वारागत्रमृतहस्या नानंदयति। वत अहे। कथं अतः मुग्धं तोदकदायासां ताः। अपगतकमलशोभाः कृशा स्थव पंथप्रिपतमस्यभर्तुर्मधुपते
१२५ : स्मवमिहं ॥ २३ ॥ तदैव देवा देवागतेहंसं हृतं कल्पयित्वाड़ः हे हंस ति। नः अस्मान्न ति पुरा रहसि उक्तं किंवा चलसौहृदः स्मरति। स्मत्वैव मां प्रस्थापितवान् निमित्ते चेत् अत आड़ः हे सौहृदस्थ
इस्माहृतं कस्मात् तं वर्यं भ जा मः कामार्थमाहृयति पुष्मदाज्ञेति चेत् अत आड़ः अहोत हि तं रहालापय आकारय। ओमिति गच्छं तमिव तं पुनराड़ः। या। स्मा त्वं वधित्वा एकाकिनी रमते

उष्ण सूदाः कर्शिता वत सिंधुपत्न्याः संप्रत्ययातकमलश्रियस्थभर्तुः॥ यद्दह्यं च उपतेः श्रायावलोकमप्राप्य तुष्टहृदयाः पूर्ण कर्शिताम्स्म
॥ २३ ॥ हंस स्वागतमास्यतां पिब पयो ब्रूह्यंग सौरे। कथां हृतं त्वा तु विदाम कचिद्विरजितः स्वस्त्यास्ते उक्तं पुरा॥ किं वानश्चलसौहृदः स्मरति तं
कस्मात् जामो वयं दौत्यात् प्रापय मकामदं प्रियस्तै मैवैकनिष्ठा स्त्रियां ॥ २४ ॥ इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे क्रियमाणेन माधवी लो
मिरे परमां गतिं ॥ २५ ॥ श्रुतमात्रोपि यः स्त्रीणां प्रसह्याकर्षते मनः। उरुगायोरुगीतो वा पश्यंतीनां कुतः पुनः ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥

नो प्रियस्तेनमेवालापय। मातदेकनिष्ठा कथं परिहर्तुं शक्यतस्तिवेत आड़ः स्त्रियां जातवेकदत्वनां अस्मात् स्त्रीपुमध्ये किं मैवैकनिष्ठान उवयमित्यर्थः। पादं मते सुखे तोई मधु तद्दन्मधु
रालापमात्रं पस्यतां। अकामदं अरतिप्रदं प्रियस्तेन यं कस्मात् कृजामः किंतु अनाहता पि सती पुनः पुनः सेवमत्त उपते आहस्पोमानिमः स्त्रियएकनिष्ठाः एकचैव वसमा न मिष्ठेति नि
श्रायासामिति ॥ २५ ॥ तामां क लेवं भूतो नानाविनागिति चित्रमित्याह। श्रुतमात्रोपि इति। उरुभिर्गायैर्गीतैः उरु धा गीतो वा यैः कैश्चिदपि गीतैः यथा कथंचिदपि गीतो वेत्यर्थः ॥ २६ ॥ १२५